That face which is awake in all three-fold states (wakefulness, dream and deep sleep), she who is the witness, she who is devoid of the qualitites of the three-fold states, always ONE in character. That consciousness alone I am. Ascertain that, through forcefully remembering the origin/source of sleep etc.

<u>शब्दार्थ: विवरणं च</u>
जाग्रन्मुखत्रिविधधामसु साक्षिणी या जाग्रन्मुखत्रिविधधाम विलक्षणा या ।
जाग्रत्-मुख-त्रिविध-धामसु साक्षिणी या जाग्रत्-मुख-त्रिविध-धाम विलक्षणा या ।
जाग्रन्मुखत्रिविधधामसु = जाग्रत् मुखत्रिविधधामसु    अनुनासिक व्यञ्जन सन्धिं
जाग्रत् तकारान्तः, पुंलिङ्गः or जाग्रत् mfn. (-ग्रन्-ग्रती-ग्रत्)
जागृ शब्द, शतृ प्रत्यय = जाग्रत्,   जागृ - (अदादिः परस्मैपदी अकर्मकः)
जाग्रन्मुखत्रिविधधामसु – wakeful face (wakefulness) in the threefold abodes
जाग्रत् – awake (निद्राक्षये, upon dissolution of sleep)
मुख – face

मुख (नपुं) - क्षिप्ते मुखं निःसरणं संनिवेशो निकर्षणम्। पुरवर्गः।

मुख (नपुं) - वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्। मनुष्यवर्गः।

त्रिविध – threefold (धः-धा-धं)

धामसु धामन्, नकारान्तः, नपुंसकलिङ्गः, सप्त बहु

The body, house, a dwelling.

A place, a spot, a country, Birth.

धामन् (नपुं) - गृहदेहत्विट्प्रभावा धामान्यथ चतुष्पथे। नानार्थवर्गः। नानार्थवर्गः। अर्थः - गृहम्, किरणः, प्रभावः, देहः

साक्षिणी या she who is the witness साक्षिन् + ङीप् प्रत्यय

अक्षि (नपुं) - लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी। मनुष्यवर्गः। अर्थः - नेत्रम्

जाग्रत्-मुख-त्रिविध-धाम विलक्षणा या

जाग्रन्मुख=जाग्रत्-मुख अनुनासिक व्यञ्जन सन्धि

जाग्रत्-मुख-त्रिविध-धाम – awake face etc. (deep sleep, dream and awake) three types of states

विलक्षणा या – she who is devoid of those qualities

लक्षण (नपुं) - कलङ्काङ्कौ लाञ्छनं च चिह्नं लक्ष्म च लक्षणम्। दिग्वर्गः। अर्थः - चिह्नम्

स्वप्नाद्यनुस्मृतिबलात्सततैकरूपा सैवाहमस्मि चितिरित्यवधारय त्वम् ।। २२ ।

स्वप्न-आदि-अनुस्मृतिबलात्-सतत-एकरूपा स-एव-अहम्-अस्मि चितिरित्यवधारय त्वम्

स्वप्नाद्यनुस्मृतिबलात्सततैकरूपा = स्वप्न-आद्यनुस्मृतिबलात्सततैकरूपा सवर्ण दीर्घ स्वरसन्धिः

स्वप्नाद्यनुस्मृतिबलात्सततैकरूपा = स्वप्नादि अनुस्मृतिबलात्सततैकरूपा यण स्वरसन्धिः

स्वप्नाद्यनुस्मृतिबलात्सततैकरूपा = स्वप्नाद्यनुस्मृतिबलात्सतत-एकरूपा वृद्धि स्वरसन्धिः

स्वप्न-आदि= origin/source of sleep state etc.

स्वप्न (पुं) - स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि। नाट्यवर्गः। अर्थः – निद्रा

आदि (पुं)। पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रियाम्। विशेष्यनिघ्नवर्गः। अर्थः - आद्यः

अनुस्मृतिबलात् – on strength of remembrance

अनुस्मृति - Cherished recollection, recalling some idea to the exclusion of all others

स्मृति (स्त्री) - स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः। शब्दादिवर्गः। अर्थः - धर्मशास्त्रम्

स्मृति (स्त्री) - स्याच्चिन्ता स्मृतिराध्यानमुत्कण्ठोत्कलिके समे। नाट्यवर्गः। अर्थः - स्मरणम्

सतत – entire, always, unceasing

सतत (नपुं) – सततानारताश्रान्तसन्तताविरतानिशम्। स्वर्गवर्गः। अर्थः - अविरतम्

एकरूपा – one vision, one form

एक (वि) - साधारणं तु सामान्यमेकाकी त्वेक एककः। विशेष्यनिघ्नवर्गः।अर्थः - असहायः

एक (वि) - भिन्नार्थका अन्यतर एकस्त्वोऽन्येतरावपि। विशेष्यनिघ्नवर्गः। अर्थः - भिन्नार्थकाः

एक (वि) - वृन्दारकौ रूपिमुख्यावेके मुख्यान्यकेवलाः। नानार्थवर्गः। अर्थः – अन्यः, केवलः, मुख्यः

रूप (नपुं)। रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। धीवर्गः। अर्थः - नेत्रेन्द्रियविषयः

सैवाहमस्मि -सा-एव-अहम्-अस्मि

सैवाहमस्मि = सा एवाहमस्मि वृद्धि स्वरसन्धिः

सा-एव— she alone

एव (अव्य) - स्युरेवं तु पुनर्वै वेत्यवधारणवाचकाः। अव्ययवर्गः। अर्थः - निश्चयार्थः

अहम्-अस्मि - I am

चितिरित्यवधारय त्वम् – चितिः इति अवधारय त्वम्

चितिरित्यवधारय = चितिः इत्यवधारय		रेफः विसर्गसन्धि

चितिरित्यवधारय = चितिरिति अवधारय		यण स्वरसन्धिः

चितिः – consciousness

इति अवधारय – understand that it is, determine that it is, know exactly

धारय - धृङ् अवबन्धने विध्वंसने च णिजन्ते - कर्तरि लोट्लकारः (परस्मैपदम्)

त्वम् – you

<u>समासा:</u>

जाग्रन्मुखत्रिविधधामसु = जाग्रन् मुख-त्रिविध-धामसु

जाग्रन्मुखत्रिविधधाम = जाग्रन् मुख-त्रिविध-धाम

स्वप्नादि = स्वप्न-आदि

एकरूपा = एक-रूपा

---

नोदेति नास्तमुपयाति न वृद्धिमेति

नैवोपयाति परिणाममपक्षयं वा ।

स्वाध्यस्तसर्वजननादिविकारसाक्षि-

ण्येषा हि संविदिति चिन्तय संततं त्वम् ॥ २३ ॥

<u>अन्वय:</u>

नोदेति नास्तमुपयाति न वृद्धिमेति नैव परिणाममपक्षयं वा उपयाति।

स्वाध्यस्तसर्वजननादिविकारसाक्षिण्येषा त्वम् संततं संविदिति हि चिन्तय ॥ २३ ॥

(It) does not rise, does not disappear, it does not age or grow, nor is subject to change or decay. She is the (eye)-witness to all creations, modifications, etc., which are wrongly attributed to the Self. You should uninterruptedly think (of her) as the all knowing awareness

<u>शब्दार्थ: विवरणं च</u>

नोदेति नास्तमुपयाति न वृद्धिमेति नैवोपयाति परिणाममपक्षयं वा ।

न-उदेति न-अस्तम्-उपयाति न वृद्धिम्-एति न-एव-उपयाति परिणामं-अपक्षयं वा ।

स्वाध्यस्तसर्वजननादिविकारसाक्षिण्येषा हि संविदिति चिन्तय संततं त्वम् ॥ २३ ॥

स्वाध्यस्त-सर्व-जनन-आदि-विकार-साक्षिणी-एषा हि संविद्-इति चिन्तय संततं त्वम् ॥ २३ ॥

नोदेति नास्तमुपयाति न वृद्धिमेति नैवोपयाति परिणाममपक्षयं वा ।

न-उदेति न-अस्तम्-उपयाति न वृद्धिम्-एति न-एव-उपयाति परिणामं-अपक्षयं वा ।

नोदेति = न उदेति	does not rise up		गुण स्वरसन्धि

उत्+एति, इ/इण् धातु  कर्तरि लट् प्र ए

नास्तमुपयाति = न अस्तमुपयाति — सवर्ण दीर्घ स्वरसन्धिः

नास्तमुपयाति = न-अस्तम्-उपयाति – does not disappear

अस्तम् – disappearence,  setting,  vanishing — अव्यय

अस्त (अव्य) - सना नित्ये बहिर्बाह्ये स्मातीतेऽस्तमदर्शने। अव्ययवर्गः। अर्थः - अदर्शने

उपयाति approach/attain any state or condition — उप् + याति, या धातु कर्तरि लट् प्रथम पु ए

न वृद्धिमेति = न वृद्धिम्-एति – does not go into old age

वृद्धिम् - growth,  increase,  augmentation,  development — वृद्धि इकारान्तः, पुंलिङ्गः, प्र ए

वृद्धि (स्त्री) - योग्यमृद्धिः सिद्धिलक्ष्म्यौ वृद्धेरप्याह्वया इमे। वनौषधिवर्गः। अर्थः - वृद्ध्याख्यौषधिः

वृद्धि (स्त्री) - क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्। क्षत्रियवर्गः। अर्थः - अष्टवर्गाणां वृद्धिः

वृद्धि (स्त्री) - स्फातिर्वृद्धौ प्रथाख्यातौ स्पृष्टिः पृक्तौ स्नवः स्रवे। सङ्कीर्णवर्गः। अर्थः - वृद्धिः

वृद्धि (पुं) - बुधवृद्धौ पण्डितेऽपि स्कन्धः समुदयेऽपि च। नानार्थवर्गः। अर्थः – विद्वान्

एति – to go

नैवोपयाति = न-एवोपयाति — वृद्धि स्वरसन्धिः

नैवोपयाति = नैव उपयाति — गुण स्वरसन्धि

नैवोपयाति = न-एव-उपयाति

न- एव-उपयाति वा nor does it go near/approach

परिणामं - change,  alteration,  transformation

परिणाम (पुं) - परिणामो विकारे द्वे समे विकृतिविक्रिये। सङ्कीर्णवर्गः। अर्थः - प्रकृतेरन्यथाभावः

अपक्षयं - decline,  decay,  wane, dimunition, decrease, अतहेरिनग — द्वि ए

क्षय (पुं) - संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि। कालवर्गः। अर्थः - प्रलयः

क्षय (पुं) - क्षयः शोषश्च यक्ष्मा च प्रतिश्यायस्तु पीनसः। मनुष्यवर्गः। अर्थः - राजयक्ष्मा

क्षय (पुं) - क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्। क्षत्रियवर्गः। अर्थः - अष्टवर्गाणां क्षयः

क्षय (पुं) - आप्रच्छन्नमथाम्नायः सम्प्रदायः क्षये क्षिया। सङ्कीर्णवर्गः। अर्थः - अपचयः

क्षय (पुं) - तुरङ्गगरुडौ ताक्ष्यौं निलयापचयौ क्षयौ। नानार्थवर्गः। अर्थः - गृहम्

स्वाध्यस्तसर्वजननादिविकारसाक्षिण्येषा हि संविदिति चिन्तय संततं त्वम् ॥ २३ ॥

स्वाध्यस्त-सर्व-जनन-आदि-विकार-साक्षिणी-एषा हि संविद्-इति चिन्तय संततं त्वम् ॥ २३ ॥

स्वाध्यस्तसर्वजननादिविकारसाक्षिण्येषा = स्वाध्यस्तसर्वजननादिविकारसाक्षिणी एषा — यण स्वरसन्धिः

स्वाध्यस्त-सर्व-जनन-आदि-विकार-साक्षिणी-एषा - she is the (eye)-witness to all creations, modifications, etc., which are wrongly attributed to the Self

स्वाध्यस्त - Placed upon or over the self, attributed wrongly to Self — स्व+अधि+अस्+क्त

सर्व – all

जनन – producing,  causing, birth

जनन (नपुं) - जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः। कालवर्गः। अर्थः - जननम्

जनन (नपुं) – सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ। ब्रह्मवर्गः। अर्थः - वंशः

आदि – etc.

विकार – modifications

विकार (पुं) - विकारो मानसो भावोऽनुभावो भावबोधकः। नाट्यवर्गः। अर्थः - मनोविकारः

विकार (पुं) - परिणामो विकारे द्वे समे विकृतिविक्रिये। सङ्कीर्णवर्गः। अर्थः - प्रकृतेरन्यथाभावः

साक्षिणी एषा – eyewitness she (is) साक्षिन् + ङीप् प्रत्यय

अक्षि (नपुं) - लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी। मनुष्यवर्गः। अर्थः - नेत्रम्

हि संविद्-इति चिन्तय संततं त्वम्

हि - indeed

संविद् – all knowing awareness

संविद् (स्त्री) – प्रेक्षोपलब्धिश्चित्संवित्प्रतिपत्ज्ञप्तिचेतना। धीवर्गः। अर्थः - बुद्धिः

संविद् (स्त्री) - संविदागूः प्रतिज्ञानं नियमाश्रयसंश्रवाः। धीवर्गः। अर्थः - अङ्गीकारः

संविद् (स्त्री) - स्त्री संविज्ज्ञानसंभाषाक्रियाकाराजिनामसु। नानार्थवर्गः। अर्थः - ज्ञानम्, क्रियाकारः, सम्भाषणम्, युद्धम्

इति चिन्तय – think thus चिन्त धातु, लोट्, मध्य, ए

संततं – always, extended, uninterrupted, continual, regular, lasting, eternal. अव्यय

त्वम् - you

समासा:

स्वाध्यस्तसर्वजननादिविकारसाक्षिणी-

---

मच्छेषतां समवलम्ब्य सुतादिसर्वे

येन प्रियं भवति तेन सुखस्वरूपः ।

देहेन्द्रियादिविषयप्रलयैकसाक्षी

यस्मात्ततः सदिति मे निजरूपमास्स्व ॥ २४ ॥

अन्वय:

मत् शेषतां सुतादिसर्वे समवलम्ब्य, यस्मात् ततः सदिति मे निजरूपम् आस्स्व, येन प्रियं भवति तेन सुखस्वरूपः, देहेन्द्रियादिविषयप्रलय-एकसाक्षी ॥ २४ ॥

Using as a support, as all that is produced (offspring etc.), that (are) from me but other than me, thereafter dwell in my true form of pure Existence-Truth, that is the inner nature of happiness by which pleasantness happens, that One witness of the disappearance of body-senses-objects.

शब्दार्थ: विवरणं च

मच्छेषतां समवलम्ब्य सुतादिसर्वे येन प्रियं भवति तेन सुखस्वरूपः ।

मत् शेषतां सम्-अवलम्ब्य सुतादि-सर्वे येन प्रियं भवति तेन सुख-स्वरूपः ।

मच्छेषतां = मत् शेषतां छत्व व्यञ्जनसन्धि:

मत् = मम – mine अस्मद् शब्द, षष्ठी एक

शेषतां – remainder, otherness शेष + तल् (तद्धित प्रत्यय), द्वि ए

समवलम्ब्य = सम्-अवलम्ब्य अवलम्ब्य – अव्यय

or लम्ब्यः= लम्ब्+ण्यत्  लम्ब् लबिँ अवस्रंसने शब्दे च (भ्वादिः आत्मनेपदी अकर्मकः सेट् )

समवलम्ब्य - leaning on, hanging on, relied on, supporting oneself well, having depended on

सुतादिसर्वे = सुत+आदिसर्वे  सवर्ण दीर्घ स्वरसन्धिः

सुतादिसर्वे = सुत-आदि-सर्वे

सुतादिसर्वे – all that is expressed, produced, brought forth, offspring

येन – by which

प्रियं भवति – pleasantness occurs

तेन – by that

सुखस्वरूपः = सुख-स्व-रूपः – that whose essential nature is happiness

देहेन्द्रियादिविषयप्रलयैकसाक्षी यस्मात्ततः सदिति मे निजरूपमास्स्व ॥ २४ ॥

देह-इन्द्रिय-आदि-विषय-प्रलय-एक-साक्षी यस्मात्-ततः सद्-इति मे निजरूपम्-आस्स्व ॥ २४ ॥

देहेन्द्रियादिविषयप्रलयैकसाक्षी= देह+इन्द्रियादिविषयप्रलयैकसाक्षी  गुण स्वरसन्धि

देहेन्द्रियादिविषयप्रलयैकसाक्षी= देहेन्द्रिय+आदिविषयप्रलयैकसाक्षी  सवर्ण दीर्घ स्वरसन्धिः

देहेन्द्रियादिविषयप्रलयैकसाक्षी= देहेन्द्रियादिविषयप्रलय+एकसाक्षी  वृद्धि स्वरसन्धिः

देह-इन्द्रिय-आदि-विषय -प्रलय-एक-साक्षी the one witness into which the body, senses and their objects dissolve

देह – body

देह (पुं-नपुं) - कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः। मनुष्यवर्गः।

इन्द्रिय – senses

इन्द्रिय (नपुं) - गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम्। धीवर्गः। अर्थः - चक्षुरादीन्द्रियम्

इन्द्रिय (नपुं) - शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च। मनुष्यवर्गः। अर्थः - रेतस्

आदि – etc.

विषय – objects

विषय (पुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। धीवर्गः।

विषय (पुं) - नीवृज्जनपदो देशविषयौ तूपवर्तनम्। भूमिवर्गः। अर्थः - ग्रामसमुदायलक्षणस्थानम्

विषय (पुं) - उत्कर्षोऽतिशये सन्धिः श्लेषे विषय आश्रये। सङ्कीर्णवर्गः। अर्थः - आश्रयः

विषय (पुं) - विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि। नानार्थवर्गः। अर्थः – शब्दादीन्द्रियम्, यस्य यत् ज्ञातः तत्

प्रलय – disappearence

प्रलय (पुं) - संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि। कालवर्गः।

प्रलय (पुं) - घर्मो निदाघः स्वेदः स्यात्प्रलयो नष्टचेष्टता। नाट्यवर्गः। अर्थः - सात्विकभावः

प्रलय (पुं) - स्यात्पञ्चता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः। क्षत्रियवर्गः। अर्थः - मरणम्

एक-साक्षी – one witness

यस्मात्ततः सदिति मे निजरूपमास्स्व

यस्मात्-ततः – wherefrom thereafter  यद् दकारान्तः शब्दः, पुं/नपुं पञ्च ए

सद्-इति = सत् इति – Existence and Truth  जश्त्व व्यञ्जनसन्धिः

सद् – सत् - being, existing, real, essential, true

सत् (पुं) - विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः। ब्रह्मवर्गः। अर्थः - विद्वान्

सत् (वि) - सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्। नानार्थवर्गः।

मे निजरूपम् – my innermost nature

मे – for me or belonging to me अस्मद् दकारान्तः शब्दः, अलिङ्गः, चतुर् वा षष् ए

निज - innate, inborn, one's own, relating to one-self or everlasting

निज (वि) - अब्जौ शङ्खशशाङ्कौ च स्वके नित्ये निजं त्रिषु। नानार्थवर्गः। अर्थः - आत्मीयम्, नित्यम्

रूपम् – form or sense-objects

रूप (नपुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। धीवर्गः। अर्थः - नेत्रेन्द्रियविषयः

आस्स्व – dwell ! sit ! आस् (अदादिः आत्मनेपदी अकर्मकः) कर्तरि लोट् मध्य ए

समासा:

सुखस्वरूपः

देहेन्द्रियादिविषयप्रलय

एकसाक्षी

निजरूपम्

---

आदौ त्वमेव सदभूरविशेषरूप-

स्त्वत्तोदितं जगदिदं सविशेषजातम् ।

त्वय्येव तिष्ठति तथा त्वयि चावसाने

संलीयते जलनिधाविव बुद्धुदादिः ॥ २५ ॥

बुद्धुदादिः also written as बुद्बुदादिः

अन्वय:

त्वमेव आदौ अविशेषरूपः सदभूः, त्वत्तोदितं जगदिदं सविशेषजातम् ।

त्वय्येव तिष्ठति, तथा त्वयि चावसाने संलीयते, जलनिधाविव बुद्धुदादिः ॥ २५ ॥

In the beginning, you alone were that Unified Existence, arisen/impelled from within you this Movement (Universe) with its multiplicity came to be. It then establishes in you alone, and at the end it dissolves in you, like a bubble in a waterbody.

शब्दार्थ: विवरणं च

आदौ त्वमेव सदभूरविशेषरूपस्त्वत्तोदितं जगदिदं सविशेषजातम् ।

आदौ त्वम् एव सद्-अभूः अविशेषरूपः त्वत्-तोदितं जगद्-इदं सविशेषजातम् ।

आदौ – in the beginning आदि इकारान्तः, पुंलिङ्गः, सप्तमी ए

आदि (पुं) - पुंस्यादिः पूर्वपौरस्त्यप्रथमाद्या अथास्त्रियाम्। विशेष्यनिघ्नवर्गः। अर्थः - आद्यः

त्वमेव = त्वम+एव गुण स्वरसन्धि

त्वम् एव – you alone

सद् = सत् - Existence-Truth

सत् (पुं) - विद्वान्विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः। ब्रह्मवर्गः। अर्थः - विद्वान्

सत् (वि) - सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्। नानार्थवर्गः।

अभू: - were भू (सत्तायाम् अस्ति भवति विद्यते) कर्तरि लुङ्लकारः मध्य ए (भ्वादिः परस्मैपदी अकर्मकः सेट् )

सदभूरविशेषरूपस्त्वत्तोदितं = सत् +अभूरविशेषरूपस्त्वत्तोदितं जश्त्व व्यञ्जनसन्धिः

सदभूरविशेषरूपस्त्वत्तोदितं = सदभू: + अविशेषरूपस्त्वत्तोदितं रेफः विसर्गसन्धि

अविशेषरूपस्त्वत्तोदितं = अविशेषरूप: + त्वत्त: +उदितं

अविशेषरूपस्त्वत्तोदितं = अविशेषरूप: + त्वत् + तोदितं

अविशेषरूपस्त्वत्तोदितं = अविशेषरूप: + त्वत्तोदितं

अविशेषरूपस्त्वत्तोदितं = अविशेषरूप: + त्वत्त: +उदितं

अविशेषरूपस्त्वत्तोदितं = अविशेषरूपस्त्वत् + तोदितं

अविशेषरूप: - One Being (form) without duality

अविशेष - without any difference, alike, similar, uniform, identity, sameness.

विशेष (वि) - विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः। कालवर्गः। अर्थः - कालावस्था

त्वत्तोदितं = त्वत्त: + उदितं विसर्गलोप: + गुण स्वरसन्धिः

त्वत्त: - from you युष्मद् + तसिल्

उदितं - arisen उदित वद धातु – क्त प्रत्यय:

त्वत्तोदितं = त्वत् + तोदितं

त्वत् – from you युष्मद् दकारान्तः, अलिङ्गः, सम्बोधनाभावः, पञ्चमी ए

तोदितं – impelled, incited, goaded

जगदिदं = जगत्-इदं जश्त्व व्यञ्जनसन्धिः

जगद्-इदं – this Movement (Universe)

जगत् (नपुं) - त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्। भूमिवर्गः। अर्थः - लोकः

जगत् (वि) - त्रिष्वितो जगदिङ्गेऽपि रक्तं नील्यादि रागि च। नानार्थवर्गः। अर्थः - चरम्

सविशेष- with differences or non-uniformities (multiplicity)

जातम् – brought into existence, engendered, produced born जातं, नपुँ, (जन् + कर्त्तरि क्तः ) = व्यक्तम्

त्वय्येव तिष्ठति तथा त्वयि चावसाने संलीयते जलनिधाविव बुद्बुदादिः ॥ २५ ॥

त्वयि-एव तिष्ठति तथा त्वयि चावसाने संलीयते जलनिधौ-इव बुद्बुद-आदिः ॥ २५ ॥

त्वय्येव = त्वयि एव यण स्वरसन्धिः

त्वयि-एव – in you alone युष्मद् दकारान्तः, अलिङ्गः, सम्बोधनाभावः, सप्तमी ए

तिष्ठति – (it) stands स्था, कर्तरि, लट्, प्र, ए

तथा त्वयि – and, in you

च-अवसाने – and at death, during cessation अव + साने; सो षो अन्तकर्मणि (दिवादिः परस्मैपदी सकर्मकः अनिट् )

सो + ल्युट् = सान (नपुँ)

अवसान (नपुं) - जवने जूतिः सातिस्त्ववसाने स्यादथ ज्वरे जूर्तिः। सङ्कीर्णवर्गः। अर्थः - समापनम्

संलीयते – disappears, hides in, retires सम्+ली लीङ् श्लेषणे (दिवादिः आत्मनेपदी अकर्मकः अनिट् स्वादिः) प्र ए

जलनिधाविव = जलनिधौ + इव अयवायाव: स्वरसन्धि:

जलनिधौ-इव – like in a water reservoir, like in the sea निधौ – निधि सप्तमी ए

जलनिधि (पुं) - रत्नाकरो जलनिधिर्यादःपतिरपाम्पतिः। वारिवर्गः। अर्थः - समुद्रः

बुद्बुद-आदिः – gurgling of water, bubbles etc.

बुद्बुद m. (-दः) A bubble. E. बुद् imitative sound, बुद् to perceive, aff. क ।

बुद्बुद न० बुद-- क पृषो० द्वित्वम् । जलस्य लोलाकारे विकारमेदअमरः । “पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत्” ।सुखबो० उक्ते २ गर्भावस्थाभेदे च ।

Sudha Emany: क प्रत्यय:, which is basically the letter अ पृषो probably refers to a class of words in ashtadhyayi that are formed itregularly— पृषोदरादीनि यथोपदिष्टम्।

https://ashtadhyayi.com/sutraani/6/3/109

बुद्बुद-आदिः bubble, type of anything very transitory, Embryo five days old

समासा:

अविशेषरूप:

सविशेषजातम्

जलनिधि

बुद्बुदादिः

---

व्यापित्वहेतुबलतो न दिशास्ति मेऽन्तो

नित्यत्वहेतुबलतश्च न कालतोऽन्तः ।

सार्वात्म्यहेतुबलतश्च न वस्तुतोऽन्त-

स्तस्मादनन्तमिति मे निजरूपमास्स्व ॥ २६ ॥

अन्वय:

मे व्यापित्वहेतुबलतो अन्तो दिशा न अस्ति, नित्यत्वहेतुबलतश्च कालत: अन्तः न,

सार्वात्म्यहेतुबलतश्च न वस्तुतोऽन्तः, तस्माद् मे अनन्तमिति निजरूपम् आस्स्व ॥ २६ ॥

There is no cardinal direction within me due to my nature of expansiveness, there is no end of time due to my eternal nature, there is no boundary within me in truth due to my nature of belonging to all. Therefore, you should repose in my limitless true nature.

शब्दार्थ: विवरणं च

व्यापित्वहेतुबलतो न दिशास्ति मेऽन्तो नित्यत्वहेतुबलतश्च न कालतोऽन्तः ।

व्यापित्व-हेतुबलत: न दिशा-अस्ति मे-अन्तो नित्यत्वहेतुबलत: च न कालत: अन्तः ।

व्यापित्वहेतुबलतो न – व्यापित्वहेतुबलत: न उकार विसर्गसन्धिः + गुण स्वरसन्धिः

व्यापित्वहेतुबलत: - arising from, as a consequence of, the strength of pervasiveness/universality

व्यापित्व - pervasiveness, extensiveness, universality व्यापिन् + त्व व्यापिन् नकारान्तः, पुंलिङ्गः, इन्नन्तः

हेतुबलतः - arising from its strength, because of the strength of this root cause

हेतु - cause, reason, object, motive, source, origin, a means or instrument.

बलतः - from strength — तसिल्, पञ्चमी विभक्ती अर्थ

न दिशास्ति मेऽन्तो – there is no cardinal direction in me

दिशास्ति = दिशा + अस्ति — सवर्ण दीर्घ स्वरसन्धिः

दिशा - direction, quarter of the compass, region,

अस्ति - is

मेऽन्तो नित्यत्वहेतुबलतश्च = मे+अन्तो नित्यत्वहेतुबलतश्च = मे+अन्तः नित्यत्वहेतुबलतश्च — उकार विसर्गसन्धिः + गुण स्वरसन्धिः

नित्यत्वहेतुबलतश्च = नित्यत्वहेतुबलतः च — सकार विसर्गसन्धिः + श्चुत्व व्यञ्जनसन्धिः

मे – मह्यम्/मम - in me — अस्मद् दकारान्तः, अलिङ्गः, सम्बोधनाभावः, चतुर्थी/षष्ठी

अन्तो – nearest, or final limit

नित्यत्वहेतुबलतः च न कालतः अन्तः –

नित्यत्व – eternal/everlasting nature, changelessness — नित्यत्वम् नपुं - नित्य + त्व

हेतुबलतः - and because of the strength of this root cause

च न कालतः अन्तः – there is no end of time — कालतः - तसिल्, पञ्चमी विभक्ती अर्थ

सार्वात्म्यहेतुबलतश्च न वस्तुतोऽन्तस्तस्मादनन्तमिति मे निजरूपमास्स्व ॥ २६ ॥

सार्वात्म्य-हेतुबलतः च न वस्तुतः अन्तः तस्माद्-अनन्तमिति मे निजरूपम् आस्स्व ॥ २६ ॥

सार्वात्म्यहेतुबलतश्च न वस्तुतोऽन्तः

सार्वात्म्यहेतुबलतश्च = सार्वात्म्यहेतुबलतः च — सकार विसर्गसन्धिः + श्चुत्व व्यञ्जनसन्धिः

सार्वात्म्य – characteristic of all, belonging to all — सर्व+आत्मन् + ष्यञ्

हेतुबलतः च – and because of the strength of this root cause

वस्तुतोऽन्तस्तस्मादनन्तमिति = वस्तुतः + अन्तस्तस्मादनन्तमिति — उकार विसर्गसन्धिः + गुण स्वरसन्धिः

वस्तुतोऽन्तस्तस्मादनन्तमिति = वस्तुतोऽन्तः तस्मादनन्तमिति — सकार विसर्गसन्धिः

वस्तुतोऽन्तस्तस्मादनन्तमिति = वस्तुतोऽन्तस्तस्मात्+अनन्तमिति — जश्त्व व्यञ्जनसन्धिः

वस्तुतोऽन्तः= वस्तुतः अन्ते

वस्तुतः - in truth, without doubt, certainly — अव्ययः, वस्तु + तस्

न अन्तः - no end

तस्मादनन्तम् इति मे निजरूपम् आस्स्व

तस्मात् अनन्तम् इति – thus, therefore endless

मे निजरूपम् – in my true nature

आस्स्व – sit, station yourself — आस् आसँ उपवेशने (अदादिः आत्मनेपदी अकर्मकः सेट् ), कर्तरि लोट् मध्य ए

<u>समासाः</u>

व्यापित्वहेतुबलतः

नित्यत्वहेतुबलतः

सार्वात्म्यहेतुबलतः

निजरूपम्

एवं निरन्तरसमाधिवशान्निराधि-

ज्ञ्ज्ञानाग्निदग्धसहकारणजन्मबीजः ।

आविर्भवन्निजसुखानुभवैकतृप्तो

ब्रह्मैव नूनमिह संभवसि ध्रुवं त्वम् ॥ २७ ॥

<u>अन्वयः</u>

एवं निरन्तरसमाधिवशात्, नूनमिह ध्रुवं आविः ब्रह्मैव भवत्, त्वम् निराधिः ज्ञानाग्निदग्धसहकारणजन्मबीजः निजसुखानुभवैकतृप्तो संभवसि ॥ २७ ॥

In this manner, as a consequence of uninterrupted absorption of thought into the Supreme Spirit, verily and firmly evident that that Brahman alone is, you will become one who is free from anxiety, one whose seed of birth and its underlying cause are sublimated in the fire of knowledge, one who is content with only the blissful experience of one's true self.

<u>शब्दार्थः विवरणं च</u>

एवं निरन्तरसमाधिवशान्निराधिर्ज्ञानाग्निदग्धसहकारणजन्मबीजः ।

एवं निरन्तर-समाधि-वशात् निराधिः ज्ञान-अग्नि-दग्ध-सहकारण-जन्म-बीजः ।

निरन्तरसमाधिवशान्निराधिर्ज्ञानाग्निदग्धसहकारणजन्मबीजः = निरन्तरसमाधिवशात् + निराधिर्ज्ञानाग्निदग्धसहकारणजन्मबीजः अनुनासिक व्यञ्जनसन्धिः

निरन्तरसमाधिवशान्निराधिर्ज्ञानाग्निदग्धसहकारणजन्मबीजः = निरन्तरसमाधिवशान्निराधिः + ज्ञानाग्निदग्धसहकारणजन्मबीजः रेफः विसर्गसन्धिः

निरन्तरसमाधिवशान्निराधिर्ज्ञानाग्निदग्धसहकारणजन्मबीजः = निरन्तरसमाधिवशान्निराधिर्ज्ञान + अग्निदग्धसहकारणजन्मबीजः सवर्ण दीर्घ स्वरसन्धिः

एवं - thus

निरन्तर – always, without interruption, dense, without interstices, boundless

निरन्तर (वि) - घनं निरन्तरं सान्द्रं पेलवं विरलं तनु। विशेष्यनिघ्नवर्गः। अर्थः - निबिडम्

समाधि - perfect absorption of thought into the Supreme Spirit

समाधि (पुं) – अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः। धीवर्गः। अर्थः - अङ्गीकारः

समाधि (पुं) - स्युः समर्थननीवाकनियमाश्च समाधयः। नानार्थवर्गः । अर्थः – मनोनिग्रहः, समर्थनम्, धान्यादिसञ्चयः

वशात् – under the influence of, under the control of, through the power or influence of

अव्ययः (also, but not relevant, वश शब्द, पञ्चीं ए)

निराधिः - free from anxiety

ज्ञान-अग्नि - fire of knowledge

दग्ध- burnt — दह् + क्त : दहँ भस्मीकरणे (भ्वादिः परस्मैपदी सकर्मकः अनिट् )

सहकारण- together with its source/reason

सह (अव्य) - कदाचिज्जातु सार्धं तु साकं सत्रा समं सह। अव्ययवर्गः

कारण (नपुं) - हेतुर्ना कारणं बीजं निदानं त्वादिकारणम्। कालवर्गः। अर्थः - कारणम्

जन्म-बीजः - seed of birth

जन्म (पुं) - जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः। कालवर्गः। अर्थः – जननम् Birth

बीज (नपुं) - हेतुर्ना कारणं बीजं निदानं त्वादिकारणम्। कालवर्गः। अर्थः – कारणम् Cause

बीज (नपुं) - शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च। मनुष्यवर्गः। अर्थः - रेतस्

आविर्भवन्निजसुखानुभवैकतृप्तो ब्रह्मैव नूनमिह संभवसि ध्रुवं त्वम् ॥ २७ ॥

आविर्भवत्-निज-सुख-अनुभव-एक-तृप्तो ब्रह्मा-एव नूनं-इह संभवसि ध्रुवं त्वम् ॥ २७ ॥

आविर्भवन्निजसुखानुभवैकतृप्तो = आविः + भवन्निजसुखानुभवैकतृप्तो रेफः विसर्गसन्धि

आविर्भवन्निजसुखानुभवैकतृप्तो = आविर्भवत् + निजसुखानुभवैकतृप्तो अनुनासिक व्यञ्जनसन्धिः

आविर्भवन्निजसुखानुभवैकतृप्तो = आविर्भवन्निजसुख + अनुभवैकतृप्तो सवर्ण दीर्घ स्वरसन्धिः

आविर्भवन्निजसुखानुभवैकतृप्तो = आविर्भवन्निजसुखानुभव + एकतृप्तो वृद्धि स्वरसन्धिः

आविर्भवत् – आविस् + भवत् आविस् + भू + शतृ प्रत्ययः

आविस् – evident, obvious, clear

आविस् (अव्य) - प्राकाश्ये प्रादुराविः स्यादोमेवं परमं मते। अव्ययवर्गः। अर्थः - स्फुटम्

भवत् – is happening भू + शतृ प्रत्ययः

निज – innermost, true

निज (वि) - अब्जौ शङ्खशशाङ्कौ च स्वके नित्ये निजं त्रिषु। नानार्थवर्गः। अर्थः - आत्मीयम्, नित्यम्

सुख – bliss

सुख (नपुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। कालवर्गः। अर्थः - आनन्दः

अनुभव – experience, direct perception or recognition, comprehension otherwise than from memory

अनुभव (पुं) - उपलम्भस्त्वनुभवः समालम्भो विलेपनम्। सङ्कीर्णवर्गः।

एक - one

तृप्तो – one who is satisfied तृप् तृपँ धातुः + क्त प्रत्ययः

आविर्भवन्निजसुखानुभवैकतृप्तो ब्रह्मैव = आविर्भवन्निजसुखानुभवैकतृप्तः ब्रह्मैव उकार विसर्गसन्धिः + गुण स्वरसन्धिः

ब्रह्मैव = ब्रह्म + एव वृद्धि स्वरसन्धिः

ब्रह्म-एव – he Supreme Spirit alone

नूनं-इह – truly, verily, assuredly here नूनं – अव्ययं

संभवसि – you will become सम् + भू धातुः लट्, मध्य, ए

ध्रुवं – firmly

ध्रुव (पुं) - ध्रुव औत्तानपादिः स्यादगस्त्यः कुम्भसम्भवः। दिग्वर्गः। अर्थः – ध्रुवः polar star

ध्रुव (पुं) - स्थाणुर्वा ना ध्रुवः शङ्कुर्ह्रस्वशाखाशिफः क्षुपः। वनौषधिवर्गः। अर्थः - शाखापत्ररहिततरुः

ध्रुव (वि) - शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः। विशेष्यनिघ्नवर्गः। अर्थः - नित्यम्

ध्रुव (पुं) - ध्रुवो भभेदे क्लीबे तु निश्चिते शाश्वते त्रिषु। नानार्थवर्गः। अर्थः - भभेदः, - निश्चितम्, शाश्वतम्

त्वम् - you

<u>समासाः</u>

निरन्तरसमाधिवशात् -

ज्ञानाग्निदग्धसहकारणजन्मबीजः

निजसुखानुभवैकतृप्तो

---

इत्थं गिरा विमलया परसौख्यदात्र्या
वाचा गुरोर्विमथिताखिलसंशयौघः ।
शिष्यः समाधिपरिशीलनतीक्ष्णदिव्य-
ज्ञानासिखण्डितभवाख्यविषद्रुमोऽभूत् ॥ २८ ॥

अन्वय:
इत्थं गुरो: विमलया परसौख्यदात्र्या गिरा वाचा विमथिताखिलसंशयौघः ।
तीक्ष्णदिव्यज्ञानासिखण्डित भवाख्य विषद्रुम: शिष्यः समाधिपरिशीलन अभूत् ॥ २८ ॥

Thus, through the teacher's pure song which gives the highest happiness, is the entire stream of doubts decimated, with the tree of objects called the world cut using the keen divine sword of knowledge, the Student became one constantly dwelling on the Supreme

शब्दार्थ: विवरणं च
इत्थं गिरा विमलया परसौख्यदात्र्या वाचा गुरोर्विमथिताखिलसंशयौघः ।
इत्थं गिरा विमलया परसौख्य-दात्र्या वाचा गुरो: विमथित-अखिल-संशय-ओघः ।

इत्थं – thus, in this manner

गिरा – (through) speech, words, invocation, praise, song, सरस्वती, वाणी गिर् रेफान्तः, स्त्रीलिङ्गः, तृतीया ए

गिर् (स्त्री) - ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती। शब्दादिवर्गः। अर्थः - सरस्वती

विमलया – (through/by) make pure or clean, purify, cleanse

मल (पुं-नपुं)। तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियाम्। मनुष्यवर्गः। अर्थः - मलम्

मल (पुं-नपुं) - मलोऽस्त्री पापविट्किट्टान्यस्त्री शूलं रुगायुधम्। नानार्थवर्गः। अर्थः – पापम्, पुराणकिट्टम्

परसौख्य – highest essence of pleasure/happiness/felicity सौख्य - सुख + ष्यञ्

दात्र्या – by the giver (fem.) दानकर्त्री दात्री = दा + तृच् , दात्री ईकारान्तः, स्त्रीलिङ्गः, तृतीय़ा एक
दाण् दाने (भ्वादिः परस्मैपदी सकर्मकः अनिट् )

वाचा = (through/by) speech, वाणी, सरस्वती वाच् चकारान्तः, स्त्रीलिङ्गः, तृ ए

गुरोर्विमथिताखिलसंशयौघः - गुरो: विमथित-अखिल-संशय-ओघः
गुरोर्विमथिताखिलसंशयौघः = गुरो: + विमथिताखिलसंशयौघः रेफः विसर्गसन्धिः
गुरोर्विमथिताखिलसंशयौघः = गुरोर्विमथित + अखिलसंशयौघः सवर्ण दीर्घ स्वरसन्धिः
गुरोर्विमथिताखिलसंशयौघः = गुरोर्विमथिताखिलसंशय + ओघः वृद्धि स्वरसन्धिः

गुरोः - from/of the Guru बृहस्पतिः, संस्कारादिकर्तुर्गुरुः गुरु उकारान्तः, पुंलिङ्गः, घिसंज्ञकः, पञ्च/षष् ए

गुरु (पुं) - बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः। दिग्वर्गः। अर्थः - बृहस्पतिः

गुरु (पुं) - उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः। ब्रह्मवर्गः। अर्थः - संस्कारादिकर्तुर्गुरुः

विमथित – well churned, well destroyed वि+मथ+क्त

अखिल – whole, entire, complete नास्ति खिलम् अवशिष्टम् यस्य

अखिल (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। विशेष्यनिघ्नवर्गः। अर्थः - समग्रम्

संशय – doubt

संशय (पुं) - अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः। धीवर्गः। अर्थः - संशयज्ञानम्

ओघः – heap of, continuous stream, current उच् + घञ्= ओकः (अवसाने ओगः???)

ओघ (पुं) - विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात्। नाट्यवर्गः। अर्थः - द्रुतनृत्यगीतवाद्यम्

ओघ (पुं) – स्तोमौघनिकरव्रातवारसङ्घातसञ्चयाः। सिंहादिवर्गः। अर्थः - समूहः

ओघ (पुं) - परिघः परिघातेऽस्त्रेऽप्योघो वृन्देऽम्भसां रये। नानार्थवर्गः। अर्थः - अम्भसां रयः

शिष्यः समाधिपरिशीलनतीक्ष्णदिव्यज्ञानासिखण्डितभवाख्यविषद्रुमोऽभूत् ॥ २८ ॥

शिष्यः समाधि-परिशीलन-तीक्ष्ण-दिव्य-ज्ञानासि-खण्डित-भवाख्य-विषद्रुमो अभूत् ॥ २८ ॥

शिष्यः – student शास्-क्यप् worthy of being taught

शिष्य (पुं) - छात्रान्तेवासिनौ शिष्ये शैक्षाः प्राथमकल्पिकाः। ब्रह्मवर्गः। अर्थः - शिष्यः

समाधिपरिशीलनतीक्ष्णदिव्यज्ञानासिखण्डितभवाख्यविषद्रुमोऽभूत् = समाधिपरिशीलनतीक्ष्णदिव्यज्ञानासिखण्डितभवाख्यविषद्रुमः अभूत्

उकार विसर्गसन्धिः + गुण स्वरसन्धिः

समाधि – concentration of mind on one object, perfect absorption of thought into the one object of meditation, i.e. the Supreme Spirit

समाधि (पुं) – अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः। धीवर्गः। अर्थः - अङ्गीकारः

समाधि (पुं) - स्युः समर्थननीवाकनियमाश्च समाधयः। नानार्थवर्गः। अर्थः - मनोनिग्रहः, समर्थनम्, धान्यादिसञ्चयः

परिशीलन – Constant contact, intercourse, or correspondence, study, application or attachment (to a thing), steady or fixed pursuit

शील (नपुं) - शुचौ तु चरिते शीलमुन्मादश्चित्तविभ्रमः। नाट्यवर्गः। अर्थः - सुस्वभावः

शील (नपुं) - शीलं स्वभावे सद्वृत्ते सस्ये हेतुकृते फलम्। नानार्थवर्गः। अर्थः - स्वभावः, सद्वृत्तम्

तीक्ष्ण – Sharp (in all senses), pungent; hot, warm (as rays); fiery, passionate.

तीक्ष्ण (नपुं) - तिग्मं तीक्ष्णं खरं तद्वन्मृगतृष्णा मरीचिका। दिग्वर्गः। अर्थः - अत्युष्णम्

तीक्ष्ण (नपुं) - लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी। वैश्यवर्गः। अर्थः - लोहः

तीक्ष्ण (नपुं) - विषाभिमरलोहेषु तीक्ष्णं क्लीबे खरे त्रिषु। नानार्थवर्गः। अर्थः - अभिमरः

दिव्य – divine, heavenly, supernatural, wonderful दिवि भवः यत्, -व्यः-व्या-व्यं

ज्ञानासि – sword of knowledge, learning ज्ञानम् एव असिः इति ज्ञानासिः

ज्ञान (नपुं) - मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः। धीवर्गः। अर्थः – मोक्षोपयोगिबुद्धिः

असि (पुं) - तूण्यां खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः। क्षत्रियवर्गः। अर्थः - खड्गः

खण्डित – cut, broken in pieces, destroyed, annihilated, lost, decayed खण्ड् + क्त

भवाख्य – भव-आख्य – called/termed as the world

विषद्रुमो - विषयुक्तो द्रुमः – tree of objects द्रुमः- a tree

अभूत् – became भू धातुः कर्तरि लुङ्लकारः प्रथम पु ए

<u>समासा:</u>

परसौख्यदात्र्या

अखिलसंशयौघः

समाधिपरिशीलनतीक्ष्णदिव्यज्ञानासि

स्वानन्दमप्रतिहतं परिभुज्य हर्षा -
दश्रुप्रपूर्णनयनः पुलकाङ्किताङ्गः ।
शिष्यः सगद्गदमुवाच गुरुं घृणाधिं
नत्वा तदङ्घ्रियुगलं विनयोपयुक्तः ।। २१ ।।

<u>अन्वय:</u>
स्वानन्दमप्रतिहतं परिभुज्य, गुरुं घृणाधिं नत्वा, हर्षादश्रुप्रपूर्णनयनः पुलकाङ्किताङ्गः तदङ्घ्रियुगलं विनयोपयुक्तः शिष्यः सगद्गदम् उवाच,
।। २१ ।।

Having unobstructedly enjoyed his own Bliss, after having bowed to the teacher who is the epitome of compassion, eyes overflowing with tears due to joy, all limbs marked by hair standing end, endowed with proper decorum towards his (Guru's) pair of feet, the pupil stuttered as he spoke.

<u>शब्दार्थ: विवरणं च</u>
स्वानन्दमप्रतिहतं परिभुज्य हर्षादश्रुप्रपूर्णनयनः पुलकाङ्किताङ्गः ।
स्वानन्दम्-अप्रतिहतं परिभुज्य हर्षाद्-अश्रुप्रपूर्ण-नयनः पुलकाङ्कित-अङ्गः ।
स्वानन्दम् = स्व + आनन्दं सवर्ण दीर्घ स्वरसन्धिः
स्वानन्दम् – own (inner) bliss
स्व (पुं) - सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः। मनुष्यवर्गः। अर्थः - सगोत्रः
स्व (पुं) - स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने। नानार्थवर्गः। अर्थः - आत्मा, धनम्, आत्मीयम्
आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। कालवर्गः। Joy
अप्रतिहतं - not obstructed or impeded, irresistible
परिभुज्य – having eaten, having used, having enjoyed परि + भुज् + ल्यप्
हर्षादश्रुप्रपूर्णनयनः = हर्षाद् अश्रुप्रपूर्णनयनः = हर्षात् अश्रुप्रपूर्णनयनः जश्त्व व्यञ्जनसन्धिः
हर्षाद् = हर्षात् – due to (or emanating from) happiness/joy/delight
हर्ष (पुं) - मुत्प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः। कालवर्गः। अर्थः - आनन्दः
अश्रु-प्रपूर्ण – completely- or over- filled with tears
अश्रु (नपुं) - दृग्दृष्टी चास्त्रु नेत्राम्बु रोदनं चास्त्रमश्रु च। मनुष्यवर्गः। अर्थः – अश्रुः
पूर्ण (वि) - समग्रं सकलं पूर्णमखण्डं स्यादनूनके। विशेष्यनिघ्नवर्गः। अर्थः - समग्रम्
पूर्ण (वि) - पूर्णस्तु पूरिते क्लिष्टः क्लिशितेऽवसिते सितः। विशेष्यनिघ्नवर्गः
नयनः – eye
नयन (नपुं) - लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी। मनुष्यवर्गः। अर्थः - नेत्रम्

पुलकाङ्किताङ्गः = पुलक-अङ्किताङ्गः सवर्ण दीर्घ स्वरसन्धि

पुलकाङ्किताङ्गः = पुलकाङ्कित + अङ्गः सवर्ण दीर्घ स्वरसन्धिः

पुलक: -horripulation, bristling of little hairs पुल + कन् (तद्धित प्रत्ययः)

अङ्कित – marked by, branded अङ्क--क्त

अङ्गः – body, limbs of the body

अङ्ग (नपुं) - अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम्। मनुष्यवर्गः। अर्थः - देहावयवः

अङ्ग (अव्य) - पुनरर्थेऽङ्ग निन्दायां दुष्ठु सुष्ठु प्रशंसने। अव्ययवर्गः। अर्थः - पुनरर्थः

शिष्यः सगद्गदमुवाच गुरुं घृणाधिं नत्वा तदङ्घ्रियुगलं विनयोपयुक्तः ।। २९ ।।

शिष्यः सगद्गदम् उवाच गुरुं घृणाधिं नत्वा तद्-अङ्घ्रि-युगलं विनय-उपयुक्तः ।। २९ ।।

शिष्यः – student शास् + क्यप्

शिष्य (पुं) - छात्रान्तेवासिनौ शिष्ये शैक्षाः प्राथमकल्पिकाः, ब्रह्मवर्गः

सगद्गदम् – together with stammering, stuttering, faltering

उवाच – spoke ब्रू or वच् धातुः, लिट् प्रथम पु ए

गुरुं – to the teacher

गुरु (पुं) - बृहस्पतिः सुराचार्यो गीर्पतिर्धिषणो गुरुः। दिग्वर्गः। अर्थः – बृहस्पतिः jupiter

गुरु (पुं) - उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः. ब्रह्मवर्गः. अर्थः - संस्कारादिकर्तुर्गुरुः

घृणाधिं - घृणा + अधिं

घृणा - compassion, pity, tenderness

घृणा (स्त्री) - उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा। नाट्यवर्गः। अर्थः - करुणरसः

घृणा (स्त्री) - अर्तनं च ऋतीया च ह्रणीया च घृणार्थकाः। सङ्कीर्णवर्गः। अर्थः - जुगुप्सनम्

घृणा (स्त्री) - तृष्णे स्पृहापिपासे द्वे जुगुप्साकरुणे घृणे। नानार्थवर्गः। अर्थः - जुगुप्सा

अधिं – (to one who is) over and above, a pinnacle

नत्वा – having bowed down नम् + क्त्वा

तदङ्घ्रियुगलं = तत् अङ्घ्रियुगलं जश्त्व व्यञ्जनसन्धिः

तद्-अङ्घ्रिं – to that foot अङ्घि--गतौ करणे क्रिन् अङ्घ् अघिँ गत्याक्षेपे

अङ्घ्रि (पुं) - पादाग्रं प्रपदं पादः पदङ्घ्रिश्चरणोऽस्त्रियाम्। मनुष्यवर्गः। अर्थः - चरणः

युगलं – to the pair

युगल (नपुं) - स्त्रीपुंसौ मिथुनं द्वन्द्वं युग्मं तु युगुलं युगम्। सिंहादिवर्गः। अर्थः - युग्मम्

विनयोपयुक्तः = विनय + उपयुक्तः गुण स्वर सन्धिः

विनय – humility, decorum वि+नी+अच्

उपयुक्तः - proper, right, touched by (joined with) उप + युज्--क्त

<u>समासा:</u>

अश्रुप्रपूर्णनयनः

तदङ्घ्रियुगलं

---

स्वामिन्भवद्वचनदिव्यसुधाभिषिक्त-
स्वानन्दमञ्जुनगरे विहरामि नित्ये ।
अज्ञानदुर्हृदमतीव शितेन सम्य-
ग्ज्ञानासिना परिविलूय सहानुजातम् ॥ ३० ॥

<u>अन्वय:</u>
स्वामिन् भवद्वचनदिव्यसुधाभिषिक्तस्वानन्दमञ्जुनगरे नित्ये विहरामि ।
अतीव शितेन सम्यग्ज्ञानासिना सहानुजातम् अज्ञानदुर्हृदम् परिविलूय ॥ ३० ॥

O Master! having been sprinkled by the divine nectar of your words, I roam uninterruptedly in the most pleasing town of Self-knowledge. Using a well sharpened sword of proper knowledge, having cut off completely the evil-heart of ignorance which was born alongside and together (with my birth).

ChatGPT:
"O Lord, in the delightful city of self-bliss, consecrated by the divine nectar of Your words, I dwell eternally.
With the exceedingly sharp sword of right knowledge, I have thoroughly cut asunder the dark heart of ignorance that accompanied me."

<u>शब्दार्थ: विवरणं च</u>
स्वामिन्भवद्वचनदिव्यसुधाभिषिक्तस्वानन्दमञ्जुनगरे विहरामि नित्ये ।
स्वामिन् भवद्-वचन-दिव्य-सुधा-अभिषिक्त-स्वानन्द-मञ्जु-नगरे विहरामि नित्ये ।
स्वामिन्भवद्वचनदिव्यसुधाभिषिक्तस्वानन्दमञ्जुनगरे = स्वामिन्भवद्वचनदिव्यसुधा अभिषिक्तस्वानन्दमञ्जुनगरे    सवर्ण दीर्घ स्वरसन्धिः
स्वामिन्भवद्वचनदिव्यसुधाभिषिक्तस्वानन्दमञ्जुनगरे = स्वामिन्भवद्वचनदिव्यसुधाभिषिक्तस्व आनन्दमञ्जुनगरे    सवर्ण दीर्घ स्वरसन्धिः

स्वामिन् – O Master!    स्वामिन् नकारान्तः, पुंलिङ्गः, सम्बोधनम् ए
- स्वामिन् (पुं) - स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च। क्षत्रियवर्गः। अर्थः - राजा
- स्वामिन् (पुं) - इभ्य आढ्यो धनी स्वामी त्वीश्वरः पतिरीशिता। विशेष्यनिघ्नवर्गः। अर्थः - अधिपतिः

भवद् – your (in sandhi)    भवत् तकारान्तः, पुंलिङ्गः

वचन – words    ब्रू / वच् धातू + ल्युट्
- वचन (नपुं) - व्याहार उक्तिर्लपितं भाषितं वचनं वचः। शब्दादिवर्गः। अर्थः - वचनम्

दिव्य – divine, heavenly, wonderful    दिव्+यत्    दिव् वकारान्तः, स्त्रीलिङ्गः

सुधा – beverage of the gods, nectar, ambrosia
- सुधा (स्त्री) - स्यात्सुधर्मा देवसभा पीयूषममृतं सुधा। स्वर्गवर्गः। अर्थः – अमृतम् nectar
- सुधा (स्त्री) - वधूर्जाया स्नुषा स्त्री च सुधा लेपोऽमृतं स्नुही। नानार्थवर्गः।

अभिषिक्त – sprinkled    अभि + सिंच्+क्त प्रत्यय

स्वानन्द – own (inner) bliss
- स्व (पुं) - सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः। मनुष्यवर्गः। अर्थः - सगोत्रः
- स्व (पुं) - स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने। नानार्थवर्गः। अर्थः - आत्मा, धनम्, आत्मीयम्
- आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। कालवर्गः। Joy

मञ्जु – beautiful, charming, sweet, pleasing, agreeable, attractive

मञ्जु (वि) - कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम्। विशेष्यनिघ्नवर्गः। अर्थः - मनोरमम्

नगरे – in the town/city नगा इव प्रासादादयः सन्ति यत्र

विहरामि – I roam, I wander through, I divert myself

नित्ये – always, continually, forever, in steadiness

नित्य (नपुं) - नित्यानवरताजस्रमप्यथातिशयो भर। स्वर्गवर्गः। अर्थः – अविरतम् continuous

नित्य (वि) - शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः। विशेष्यनिघ्नवर्गः।

अज्ञानदुर्हृदमतीव शितेन सम्यग्ज्ञानासिना परिविलूय सहानुजातम् ॥ ३० ॥

अज्ञान-दुर्हृदम्-अतीव शितेन सम्यग्-ज्ञानासिना परिविलूय सह-अनुजातम् ॥ ३० ॥

अज्ञान – ignorance, sense of ego

अज्ञान (नपुं) - मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम्। धीवर्गः।

दुर्हृदम् – inimical, ill-disposed, bad heart, enemy, wicked दुर् हृदम्

अतीव – extremely

अतीव (अव्य) - बलवत्सुष्ठु किमुत स्वत्यतीव च निर्भरे। अव्ययवर्गः। अर्थः - अतिशयः

शितेन – by/through sharpened/whetted शित शो-क्त

सम्यग्ज्ञानासिना = सम्यक् ज्ञानासिना जश्त्व व्यञ्जनसन्धिः

सम्यग् – wholly. completely, properly

ज्ञान - असिना – through the sword of knowledge

परिविलूय – having been well cut off परि+वि+लू+ल्यप्

सह-अनुजातम् – was born-after alongside, together was reborn अनु + जन्--क्त

सह (अव्य) - कदाचिज्जातु सार्धं तु साकं सत्रा समं सह। अव्ययवर्गः।

<u>समासा:</u>

भवद्वचनदिव्यसुधाभिषिक्त

स्वानन्दमञ्जुनगरे

अज्ञानदुर्हृदम्

ज्ञानासिना

---

गच्छामि कुत्र किमहं करवाणि किं वा

गृह्णामि किं परिजहामि मयि प्रपूर्णे ।

निर्व्याजसौख्यजलधौ परिदृश्यमानं

फेनादिकं जगदिति स्थिरनिश्चयो मे ॥ ३१ ॥

<u>अन्वय:</u>

मयि प्रपूर्णे अहं कुत्र गच्छामि, किम् करवाणि, किं वा गृह्णामि, किं परिजहामि ।

निर्व्याज-सौख्य-जलधौ फेनादिकं जगदिति परिदृश्यमानं मे स्थिरनिश्चयो ॥ ३१ ॥

Within my completeness, where do I go, what shall I do, what do I grasp, what do I relinquish? The world is to be viewed like foam In that ocean of unalloyed happiness, this is my firm understanding.

<u>शब्दार्थः विवरणं च</u>

गच्छामि कुत्र किमहं करवाणि किं वा गृह्णामि किं परिजहामि मयि प्रपूर्णे ।
गच्छामि कुत्र किम् अहं करवाणि किं वा गृह्णामि किं परिजहामि मयि प्रपूर्णे ।

गच्छामि कुत्र – where do I go?
किम् अहं करवाणि – what shall I do? — कृ डुकृञ् (तनादिः) लोट् उत्तम् ए
किं वा गृह्णामि – or what do I grasp — ग्रह् लट् उत्तम् ए
किं परिजहामि – what do I renounce — परि+जहामि हा ओँहाक् त्यागे
मयि प्रपूर्णे – in my complete fullness — अस्मद् दकारान्तः, अलिङ्गः, सप्तमी ए
पूर्ण (वि) - समग्रं सकलं पूर्णमखण्डं स्यादनूनके। विशेष्यनिघ्नवर्गः। अर्थः - समग्रम्
पूर्ण (वि) - पूर्णस्तु पूरिते क्लिष्टः क्लिशितेऽवसिते सितः। विशेष्यनिघ्नवर्गः। अर्थः - पूर्णः

निर्व्याजसौख्यजलधौ परिदृश्यमानं फेनादिकं जगदिति स्थिरनिश्चयो मे ॥ ३१ ॥
निर्व्याज-सौख्य-जलधौ परिदृश्यमानं फेनादिकं जगद्-इति स्थिर-निश्चयो मे ॥ ३१ ॥
निर्व्याज-सौख्य-जलधौ – in the ocean of pure happiness

निर्व्याज – without guile, pure
व्याज (पुं) - कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे। नाट्यवर्गः। अर्थः - कपटः
व्याज (पुं) - व्याजोऽपदेशो लक्ष्यं च क्रीडा खेला च कूर्दनम्। नाट्यवर्गः। अर्थः - स्वरूपाच्छादनम्
सौख्य – quality/essence of pleasure, happiness — सुख+ष्यञ्
जलधौ - in the ocean — जलधि शब्द सप्तमी ए
परिदृश्यमानं – worthy of being seen (known) well — परि+दृश्+शानच्
फेनादिकं – like small foam (of ocean)
फेन (पुं) - डिण्डीरोऽब्धिकफः फेनः सिन्दूरं नागसंभवम्। वैश्यवर्गः। अर्थः - समुद्रफेनः

जगदिति = जगद् इति = जगत् इति — जश्त्व व्यञ्जनसन्धिः

जगद्-इति – the universe of movement is thus
जगत् (नपुं) - त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्। भूमिवर्गः। अर्थः - लोकः
जगत् (वि) - त्रिष्वितो जगदिङ्गेऽपि रक्तं नील्यादि रागि च। नानार्थवर्गः। अर्थः - चरम्
स्थिर-निश्चयो – firm determination (understanding)
निश्चय (पुं) - सन्देहद्वापरौ चाथ समौ निर्णयनिश्चयौ। धीवर्गः। अर्थः - निश्चयः
मे - of mine

---

मायाभिधो जलधरो जगदाख्यमम्बु-
वर्षत्वनेन मम चिद्वपुषः क्षतिः का ।
लाभोऽपि वा क इति संततमात्मरूपे
संचिन्तयन्स्थिरमतिर्विहरामि नित्ये ॥ ३२ ॥

अन्वय:

मायाभिधो जलधरो, जगदाख्यं अम्बुवर्षं। अनेन तु मम चिद्वपुषः का क्षतिः क लाभोऽपि वा? इति संततं संचिन्तयन्, आत्मरूपे नित्ये स्थिरमतिः विहरामि ॥ ३२

That cloud is termed Maya, rain is known as Jagat (world). By this, what decay, or what gain to my Consciousness? Thinking thus deeply and uninteruptedly, with steadfast understanding, I roam in the eternal Self.

शब्दार्थ: विवरणं च

मायाभिधो जलधरो जगदाख्यमम्बुवर्षत्वनेन मम चिद्वपुषः क्षतिः का ।

मायाभिधो जलधरो जगद्-आख्यं-अम्बु-वर्ष-तु-अनेन मम चिद्-वपुषः क्षतिः का ।

मायाभिधो जलधरो – मायाभिध: जलधर:

मायाभिध: - that which is termed Maya — माया+अभि+धा धातु:, धा=to wear, to nourish

माया (स्त्री) - स्यान्माया शाम्बरी मायाकारस्तु प्रतिहारकः। शूद्रवर्गः। अर्थः - इन्द्रजालादिमाया

जलधर: - is the cloud (that which holds water) — जलस्य धरः, धृ + अच् = धरः/धरा/धरं

जलधर (पुं) - धाराधरो जलधरस्तडित्वान्वारिदोऽम्बुभृत्। दिग्वर्गः। अर्थः - मेघः

जगदाख्यमम्बुवर्षत्वनेन = जगद् आख्यं अम्बुवर्ष तु अनेन

जगद् आख्यं = जगत् आख्यं — जश्त्व व्यञ्जनसन्धि:

त्वनेन = तु अनेन — यण स्वरसन्धि:

जगद् – the universe, that which moves

जगत् (नपुं) - त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्। भूमिवर्गः। अर्थः - लोकः

जगत् (वि) - त्रिष्वितो जगदिङ्गेऽपि रक्तं नील्यादि रागि च। नानार्थवर्गः। अर्थः - चरम्

आख्यं – is said to be — आख्या स्त्री, आ + ख्यायते अनेन, आ + ख्या--अङ्

अम्बु – water

अम्बु (नपुं) - अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम्। वारिवर्गः। अर्थः - जलम्

वर्ष – rain shower

वर्ष (नपुं) - वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ। दिग्वर्गः 1.3.11.1.2

वर्ष (पुं-नपुं) - स्याद्वृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम्। नानार्थवर्गः। अर्थः - लोकधात्वंशः

वर्ष (पुं-नपुं) - स्याद्वृष्टौ लोकधात्वंशे वत्सरे वर्षमस्त्रियाम्। नानार्थवर्गः। अर्थः - वत्सरः

तु – but/only (filler)

अनेन - by this — इदम् शब्दः तृ ए

मम चिद्-वपुषः क्षतिः का ।

मम - my

चिद्वपुषः = चित्-वपुषः — जश्त्व व्यञ्जनसन्धि:

चिद् – consciousness

चित् (स्त्री) – प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतना। धीवर्गः। अर्थः - बुद्धिः

चित् (अव्य) - यत्तद्यतस्ततो हेतावसाकल्ये तु चिच्चन। अव्ययवर्गः। अर्थः - असाकल्यम्

वपुषः – my body — वपुष् षकारान्तः, नपुं, षष् ए

देहः

क्षतिः – decay/ruin, destruction, injury, death क्षण् + क्तिन्

का – who (has)? (स्त्री)

लाभोऽपि वा क इति संततमात्मरूपे संचिन्तयन्स्थिरमतिर्विहरामि नित्ये ॥ ३२ ॥

लाभो-अपि वा क इति संततम्-आत्मरूपे संचिन्तयन्-स्थिरमतिः-विहरामि नित्ये ॥ ३२ ॥

लाभोऽपि = लाभो अपि = लाभः अपि उकार विसर्गसन्धिः + गुण स्वरसन्धिः + पूर्वरूप स्वरसन्धिः

लाभो-अपि वा क – or even gain, (is) who

इति संततम् - thus uninteruptedly

आत्मरूपे – within the form of the innermost Self

आत्मन् (पुं) - आत्मायत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च। नानार्थवर्गः। अर्थः - ब्रह्मा, बुद्धिः

रूप (नपुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। धीवर्गः। अर्थः - नेत्रेन्द्रियविषयः

संचिन्तयन् - thinking deeply thus,

स्थिरमतिः - one with a stable intellect

स्थिर - स्थिर स्थेयस् स्थेष्ठ स्था + इर (similar example गम्भ + इर – गम्भीर), सूत्र 'कृञ्-इरः'

मति (स्त्री) - बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः। धीवर्गः। अर्थः - बुद्धिः

विहरामि - roam with pleasure

नित्ये –always

<u>समासा:</u>

मायाभिधो

जलधरो

अम्बुवर्ष

चिद्वपुषः

---

वाक्कायमानसभवं सकलं हि कर्म

प्रोक्तं शुभाशुभमयं न ततोऽस्ति भिन्नम् ।

वागादिसाक्षिणि कथं मयि निर्मले स्या-

त्कर्मद्वयं तदुदितं जननादिकां वा ॥ ३३ ॥

<u>अन्वय:</u>

सकलं वाक्कायमानसभवं कर्म शुभाशुभमयं हि प्रोक्तं। ततः भिन्नम् न अस्ति।

वागादि मयि निर्मले साक्षिणि कर्मद्वयं कथं स्यात् जननादिकां तदुदितं वा ॥ ३३ ॥

All of speech, body and mind are said to be infused with auspicious and inauspicious, nothing excepted therefrom. Within my spotless (pure) witnesshood, how do speech etc., become two-fold karma (auspicicious, inauspicious). Or (how) what is called birth and consumption (arise from that)

शब्दार्थ: विवरणं च

वाक्कायमानसभवं सकलं हि कर्म प्रोक्तं शुभाशुभमयं न ततोऽस्ति भिन्नम् ।

वाक्-काय-मानस-भवं सकलं हि कर्म प्रोक्तं शुभ-अशुभ-मयं न ततो-अस्ति भिन्नम् ।

वाक् – voice, power of speech

काय – body

मानस – Pertaining to the mind, mental, produced from the mind

भवं – arising from, existence, world

सकलं – entirely, together with all parts, कलया सह वर्त्तमानम्

हि - indeed

कर्म – Karma, action, act, work कर्मन् नकारान्तः, नपुंसकलिङ्गः, प्र, ए

प्रोक्तं – it is said — प्र + ब्रू/वच् +क्त प्रत्यय

शुभाशुभमयं = शुभ + अशुभमयं — सवर्ण दीर्घ स्वरसन्धि:

शुभ-अशुभ-मयं – infused with (consisting of) auspicious and inauspicious   मय - मय्+अच्

ततोऽस्ति = तत: अस्ति — उकार विसर्गसन्धि: + गुण स्वरसन्धि: + पूर्वरूप स्वरसन्धि:

न ततो – not therefrom, not extending from

अस्ति – is

भिन्नम् – different, divided, separated — भिद्+क्त, भिद् = विदारणे

वागादिसाक्षिणि कथं मयि निर्मले स्यात्कर्मद्वयं तदुदितं जननादिकां वा ॥ ३३ ॥

वाग्-आदि-साक्षिणि कथं मयि निर्मले स्यात्-कर्मद्वयं तद्-उदितं जननादिकां वा ॥ ३३ ॥

वागादिसाक्षिणि = वाग् आदिसाक्षिणि = वाक् आदिसाक्षिणि — जश्त्व व्यञ्जनसन्धि:

वाग् – voice — वाच् in compound

आदि – etc

साक्षिणि – in the witness — साक्षिन् शब्द सप्तमी ए

कथं – how

मयि निर्मले – within my spotlessness — मयि -अस्मद् सप्तीं ए

स्यात् – may exist — अस् धातु: कर्तरि विधि प्र ए

कर्मद्वयं – two karmas

तदुदितं = तत् उदितं — जश्त्व व्यञ्जनसन्धि:

तद् - that

उदितं – it is said — वद् + क्त

जननादिकां वा – birth or one who eats/consumes (beginning with birth and so on)  आदिका – स्त्री, अद्+ण्वुल्

समासा:

वाक्कायमानसभवं

शुभाशुभमयं

वागादिसाक्षिणि

कर्मद्वयं
जननादिकां

---

व्यावृत्तरूपमिदमेव जगद्विभिन्नं
ज्ञानं त्वभिन्नमनुवृत्ततयाखिलेषु ।
ज्ञानं च भिन्नमिति चेज्जडतादिदोष-
प्राप्तिर्भवेच्छ्रुतिशिरांसि न तं सहन्ते ॥ ३४ ॥

अन्वय:
इदं व्यावृत्तरूपं विभिन्नं जगद् एव, ज्ञानं तु अनुवृत्ततया अखिलेषु अभिन्नम् ।
ज्ञानं च भिन्नमिति चेत् जडतादिदोषप्राप्ति: भवेत् श्रुतिशिरांसि न तं सहन्ते ॥ ३४ ॥

This universe is turned away (from Oneness) in form and torn apart, but Knowledge is undivided through conformity in the Whole. If Knowledge is separated (in the Whole), then defects of dullness etc are acquired., not tolerated by the highest of Vedas (Upanishads).

शब्दार्थ: विवरणं च
व्यावृत्तरूपमिदमेव जगद्विभिन्नं, ज्ञानं त्वभिन्नं अनुवृत्ततयाखिलेषु ।
व्यावृत्त-रूपम्-इदम्-एव जगद्-विभिन्नं ज्ञानं तु-अभिन्नम्-अनुवृत्त-तया-अखिलेषु ।

व्यावृत्त – turned away from, separated from वि + आ + वृत–क्त, (यण स्वरसन्धिः)
व्यावृत्त (वि) - वृत्ते तु वृत्तव्यावृत्तौ संयोजित उपाहितः। विशेष्यनिघ्नवर्गः.।अर्थः - कृतावरणः
रूपम् – form
रूप (नपुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। धीवर्गः। अर्थः - नेत्रेन्द्रियविषयः
इदम् – this
एव – alone, only
जगद् – universe of movement
जगत् (नपुं) - त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्। भूमिवर्गः। अर्थः - लोकः
जगत् (वि) - त्रिष्वितो जगदिङ्गेऽपि रक्तं नील्यादि रागि च। नानार्थवर्गः। अर्थः - चरम्
विभिन्नं - broken asunder, divided, split, dispersed. वि + भिद् + क्तः
भिन्न (वि) - सिद्धे निर्वृत्तनिष्पन्नौ दारिते भिन्नभेदितौ। विशेष्यनिघ्नवर्गः। अर्थः - भेदं प्रापितः
ज्ञानं तु – but Knowledge
ज्ञान (नपुं) - मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः। धीवर्गः। अर्थः – मोक्षोपयोगिबुद्धिः

त्वभिन्नमनुवृत्ततयाखिलेषु – तु अभिन्नमनुवृत्ततयाखिलेषु
त्वभिन्नमनुवृत्ततयाखिलेषु – त्वभिन्नमनुवृत्ततया अखिलेषु

अभिन्नम् – unsplit
अनुवृत्ततया – through customary procedure/usage, conformity, (अनु+(वृत्–क्त)+तल्) declined to तृ ए
वृत्त (नपुं) - वर्तुलं निस्तलं वृत्तं बन्धुरं तून्नतानतम्। विशेष्यनिघ्नवर्गः।

वृत्त (वि) - वृत्ते तु वृत्तव्यावृत्तौ संयोजित उपाहितः। विशेष्यनिघ्नवर्गः। अर्थः - कृतावरणः

वृत्त (नपुं) - वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तले। नानार्थवर्गः ।

अखिलेषु – in the whole (plural) अखिल - न खिलम् अस्य, सप्तमी बहु

अखिल (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। विशेष्यनिघ्नवर्गः। अर्थः - समग्रम्

ज्ञानं च भिन्नमिति चेज्जडतादिदोषप्राप्तिर्भवेच्छ्रुतिशिरांसि न तं सहन्ते ॥ ३४ ॥

ज्ञानं च भिन्नमिति चेज्जडतादिदोषप्राप्तिर्भवेच्छ्रुतिशिरांसि न तं सहन्ते ॥ ३४ ॥

ज्ञानं च – and knowledge

भिन्नम् इति – separate

चेज्जडतादिदोषप्राप्तिर्भवेच्छ्रुतिशिरांसि = चेत् जडतादिदोषप्राप्तिर्भवेच्छ्रुतिशिरांसि श्चुत्व व्यञ्जनसन्धिः

चेज्जडतादिदोषप्राप्तिर्भवेच्छ्रुतिशिरांसि = चेज्जडतादिदोषप्राप्तिः भवेच्छ्रुतिशिरांसि रेफः विसर्गसन्धि

चेज्जडतादिदोषप्राप्तिर्भवेच्छ्रुतिशिरांसि = चेज्जडतादिदोषप्राप्तिर्भवेत् श्रुतिशिरांसि छत्व + श्चुत्व व्यञ्जनसन्धिः

चेत् – if, in case of

जडतादि – dullness, slothfulness, ignorance, stupidity etc. जड+तल्

जड (वि) - शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः। दिग्वर्गः। अर्थः - शीतलद्रव्यम्

जड (वि) - जडोऽज्ञ एडमूकस्तु वक्तुं श्रोतुमशिक्षिते। विशेष्यनिघ्नवर्गः। अर्थः - मूढमतिः

दोष – defect

दोष (पुं) - दोषो वातादिके दोषा रात्रौ दक्षोऽपि कुक्कुटे। नानार्थवर्गः। अर्थः – वातादयः ??

प्राप्तिः - obtaining, acquisition, gain, attainment

प्राप्ति (स्त्री) - प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः। स्वर्गवर्गः। अर्थः - सिद्धिः

प्राप्ति (स्त्री) - उदयेऽधिगमे प्राप्तिस्त्रेता त्वग्नित्रये युगे। नानार्थवर्गः। अर्थः - उदयः, अधिकफलम्

भवेत् – happens भू धातुः कर्तरि विधिलिङ् प्रथम एक

श्रुति– the Veda, sacred knowledge, or :what was heard" श्रु+क्तिन् (स्त्री) प्रथमा ए - श्रुतिः ।

श्रुति (स्त्री) - श्रुतिः स्त्री वेद आम्नायस्त्रयी धर्मस्तु तद्विधिः। शब्दादिवर्गः। अर्थः - वेदः

श्रुति (स्त्री) - कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः। मनुष्यवर्गः।

श्रुति (स्त्री) - सिकताः स्युर्वालुकापि वेदे श्रवसि च श्रुतिः। नानार्थवर्गः। अर्थः - श्रवः

शिरांसि - the ultimate/the crown/the head (plural) शिरस् सकारान्तः, नपुं : शिरः शिरसी शिरांसि

शिरस् (पुं-नपुं)- शिरोग्रं शिखरं वा ना मूलं बुध्नोऽङ्घ्रिनामकः। वनौषधिवर्गः। अर्थः - शिखरम्

शिरस् (नपुं) - उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्। मनुष्यवर्गः। अर्थः - शिरः

शिरस् (नपुं) - कुम्भौ तु पिण्डौ शिरसस्तयोर्मध्ये विदुः पुमान्। क्षत्रियवर्गः। अर्थः - गजमस्तकौ

तं – that (objective case)

न सहन्ते – will not tolerate, will not approve (plural)

<u>समासा:</u>

व्यावृत्तरूपम्

अनुवृत्ततयाखिलेषु ।

दोषप्राप्तिः

श्रुतिशिरांसि

नैवेन्द्रियाणि विषयेषु नियोजयामि
प्राग्वासनावशत एव हि तानि यान्ति ।
स्वान्गोचरान्प्रति ममास्ति न साक्षितापि
सा साक्ष्यभेदकलिता खलु सोऽप्यसत्यः ॥ ३५ ॥

अन्वय:

नैवेन्द्रियाणि विषयेषु नियोजयामि। प्राग्वासनावशत एव हि तानि यान्ति ।
स्वान्गोचरान्प्रति सा मम साक्षितापि न अस्ति। साक्ष्यभेदकलिता खलु सोऽप्यसत्यः ॥ ३५ ॥

I never assign senses amongst (to) objects. Only under the control of prior impressions are they (objects) attained. Towards objects visible to my senses, even my witnesshood is non existent. Separate evidence (of witnessing objects) that is produced is also verily also untrue

शब्दार्थ: विवरणं च

नैवेन्द्रियाणि विषयेषु नियोजयामि प्राग्वासनावशत एव हि तानि यान्ति ।
न एव इन्द्रियाणि विषयेषु नियोजयामि प्राग्-वासनावशत एव हि तानि यान्ति ।
नैवेन्द्रियाणि – न एवेन्द्रियाणि वृद्धि स्वरसन्धि:
नैवेन्द्रियाणि – नैव इन्द्रियाणि गुण स्वरसन्धि:

न एव इन्द्रियाणि – not only senses
- इन्द्रिय (नपुं) - गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम्। धीवर्गः। अर्थः - चक्षुरादीन्द्रियम्
- इन्द्रिय (नपुं) - शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च। मनुष्यवर्गः। अर्थः - रेतस्

विषयेषु – amongst objects
- विषय (पुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। धीवर्गः। अर्थः - विषयाः
- विषय (पुं) - नीवृज्जनपदो देशविषयौ तूपवर्तनम्। भूमिवर्गः। अर्थः – ग्रामसमुदायलक्षणस्थानम् ??
- विषय (पुं) - उत्कर्षोऽतिशये सन्धिः श्लेषे विषय आश्रये। सङ्कीर्णवर्गः। अर्थः - आश्रयः
- विषय (पुं) - विषयो यस्य यो ज्ञातस्तत्र शब्दादिकेष्वपि। नानार्थवर्गः। अर्थः - शब्दादीन्द्रियम्, यस्य यत् ज्ञातः तत्

नियोजयामि - I assign

प्राग् – prior
- प्राक् (अव्य) - प्रत्यग्भवं प्रतीचीनं प्राचीनं प्राग्भवं त्रिषु। दिग्वर्गः। अर्थः - पूर्वदिक्
- प्राक् (अव्य) - प्रागतीतार्थकं नूनमवश्यं निश्चये द्वयम्। अव्ययवर्गः। अर्थः - प्राङ् देशः, अतीतकालः
- प्राक् (अव्य) - दिग्देशकाले पूर्वादौ प्रागुदक्प्रत्यगादयः। अव्ययवर्गः। अर्थः - पूर्वदिग्देशकालाः

वासना – impressions
- वासना (स्त्री) - विमर्शो भावना चैव वासना च निगद्यते। धीवर्गः। अर्थः - वासना

वशत – may they control वश् धातु: (भ्वादिगण), लोट्, मध्य बहु

एव हि – indeed only

तानि – those

यान्ति – reach/attain

स्वान्गोचरान्प्रति ममास्ति न साक्षितापि सा साक्ष्यभेदकलिता खलु सोऽप्यसत्यः ॥ ३५ ॥

स्वान्-गोचरान्-प्रति मम-अस्ति न साक्षिता-अपि सा साक्ष्य-भेद-कलिता खलु सो-अपि-असत्यः ॥ ३५ ॥

स्वान् – to ourselves स्व शब्दः, अकारान्तः, पुं, सर्वनामशब्दः, द्वितीया बहु (wrong)

गोचरान् – objects of the senses गावः इन्द्रियाणि चरन्त्यस्मिन्। गो = organ of senses (relevant meaning here)

गोचर (पुं) - गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम्। धीवर्गः। अर्थः - विषयाः

प्रति – towards, in the direction of (as a separable preposition)

प्रति (अव्य) - प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः। नानार्थवर्गः।

ममास्ति - मम-अस्ति सवर्ण दीर्घ स्वरसन्धिः

मम – mine

अस्ति – is

साक्षितापि - साक्षिता-अपि सवर्ण दीर्घ स्वरसन्धिः

न साक्षिता – not witnesshood साक्षिन् + तल्

अक्षि (नपुं) - लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी। मनुष्यवर्गः। अर्थः - नेत्रम्

अपि सा – also she

साक्ष्य – evidence/testimony साक्ष्यम् नपुँ, साक्षिन् + ष्यञ्

भेद – division/separation, difference

भेद (पुं) - भेदो दण्डः साम दानमित्युपायचतुष्टयम्। क्षत्रियवर्गः। अर्थः - उपायाः

भेद (पुं) - भेदोपजापावुपधा धर्माद्यैर्यत्परीक्षणम्। क्षत्रियवर्गः। अर्थः - भेदः

कलिता – held/taken/arisen/produced/gathered कल् + क्त, स्त्री

खलु – verily, truly

सोऽप्यसत्यः – सो अप्यसत्यः – सः अप्यसत्यः उकार विसर्गसन्धिः + गुण स्वरसन्धिः + पूर्वरूप स्वरसन्धिः

सोऽप्यसत्यः - सोऽपि असत्यः यण स्वरसन्धिः

सो-अपि- he too

असत्यः – not true अस् धातु + यत् प्रत्यय= सत्य

सत्य (वि) - सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति। शब्दादिवर्गः। अर्थः - सत्यवचनम्

सत्य (वि) - रहस्योपस्थयोर्गुह्यं सत्यं शपथतथ्ययोः। नानार्थवर्गः। अर्थः - शपथः, - तथ्यम्

<u>समासा:</u>

साक्ष्यभेदकलिता

---

भेदोऽपि साक्ष्यगत एव न साक्षिणो मे

भेदस्य साक्षिणि कथं प्रभवेत्स भेदः ।

भेदो न सुप्तिसमयेऽनुपलम्भनाच्च

सन्नास्तिता न इह दृष्टतया न वाच्या ॥ ३६ ॥

<u>अन्वयः</u>

भेदोऽपि साक्ष्यगत एव, न मे साक्षिणो। स भेदः भेदस्य साक्षिणि कथं प्रभवेत् ।
सुप्तिसमये भेदः न अनुपलम्भनात्, इह सत्-नास्तिता न दृष्टतया न वाच्या च ॥ ३६ ॥

Differences/divisions/separations come from the observed (objects) itself, not belonging to me, not belonging to the witness. How can the differences/divisions/separations exert influence in the witness of differences? During sleep-time differences are not apprehended/detected - here existence (witness) and non-existence (objects) not (discernable) through being seen and not (discernable) through speech

<u>शब्दार्थः विवरणं च</u>

भेदोऽपि साक्ष्यगत एव न साक्षिणो मे भेदस्य साक्षिणि कथं प्रभवेत्स भेदः ।
भेदः अपि साक्ष्यगत एव न साक्षिणो मे भेदस्य साक्षिणि कथं प्रभवेत्-स भेदः ।

भेदः अपि - also difference/separation — उकार विसर्गसन्धिः + गुण स्वरसन्धिः + पूर्वरूप स्वरसन्धिः
भेद (पुं) - भेदो दण्डः साम दानमित्युपायचतुष्टयम्। क्षत्रियवर्गः। अर्थः - उपायाः
भेद (पुं) - भेदोपजापावुपधा धर्माद्यैर्यत्परीक्षणम्। क्षत्रियवर्गः। अर्थः - भेदः
साक्ष्यगत एव – is arrived at from the witnessed (objects) alone — साक्ष्य=साक्षिन् + ष्यञ्
अक्षि (नपुं) - लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी। मनुष्यवर्गः। अर्थः - नेत्रम्
न साक्षिणो मे – not belonging to my witnesshood — साक्षिन् शबदः, प्र-बहु, पञ्च-ए, षष्ट-ए
भेदस्य – of the difference/separation
साक्षिणि – in the witnesser — साक्षिन् शबदः, सप्त-ए
कथं - how
प्रभवेत् – may it influence (be the source) — भवेत् – भू कर्तरि विधिलिङ्ग प्र ए
स भेदः – that difference/separation

भेदो न सुप्तिसमयेऽनुपलम्भनाच्च सन्नास्तिता न इह दृष्टतया न वाच्या ॥ ३६ ॥
भेदः न सुप्तिसमये-अनुपलम्भनात् च सत्-न-अस्तिता न इह दृष्टतया न वाच्या ॥ ३६ ॥

भेदः न - difference/separation (is) not
अनुपलम्भनाच्च = अनुपलम्भनात् च — श्चुत्व व्यञ्जनसन्धिः
सुप्ति-समये – during the time of sleep — स्त्री स्वप्-क्तिन्
समय (पुं) - कालो दिष्टोऽप्यनेहापि समयोऽप्यथ / पक्षतिः। कालवर्गः। अर्थः - समयः
समय (पुं) - समयाः शपथाचारकालसिद्धान्तसंविदः। नानार्थवर्गः।
अनुपलम्भनात् च – and after acquiring apprehension/detection — अनु + (लभ् धातुः + ल्युट् प्रत्यय) पञ्च ए
सन्नास्तिता = सत्-न-अस्तिता — अनुनासिक व्यञ्जनसन्धिः + सवर्ण दीर्घ स्वरसन्धिः
सत्-न-अस्तिता –existence (witness) & non-existence (objects) — अस्तिता may be a non Paninian usage
न इह दृष्टतया - not here, through the condition of being seen — दृश् + क्त = दृष्ट; दृष्ट+तल्= दृष्टता; तृ ए = दृष्टतया
दृष्ट (नपुं) - अदृष्टं वह्नितोयादि दृष्टं स्वपरचक्रजम्। क्षत्रियवर्गः। अर्थः - स्वपरसैन्याद्भयम्
न वाच्या – not worthy (eligible) of speech — वाच्या/वाक्या - स्त्री - ब्रू/वच् धातू + ण्यत् प्रत्ययः
वाच् (स्त्री) - ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती। शब्दादिवर्गः। अर्थः - सरस्वती

समासा:

साक्ष्यगत

सुप्तिसमये

---

विश्वं सदेतदिति कार्यकरत्वहेतो-

र्यद्यस्य सत्त्वमिह साधयितुं यतेथाः ।

तर्ह्यत्र रज्जुभुजगाद्यपि सद्बलात्स्या-

त्सत्यत्वहेतुरिदमाहुरबाधितत्वम् ॥ ३७ ॥

अन्वय:

विश्वं एतद् सद् इति, यदि (त्वम्) इह अस्य सत्त्वम् कार्यकरत्वहेतोः साधयितुं यतेथाः ।

तर्हि अत्र रज्जु-भुजग-आदि अपि सद्बलात् स्यात्। सत्यत्व-हेतुः इदम् अबाधितत्वम् आहुः ॥ ३७ ॥

(assuming) “this world is true”, if (you) strive here to extract the truth of this (world) from the agency behind work; then here the rope-snake etc. will also be (arise) from the strength of reality. The Origin of Truth is said to be unrefutable in nature.

शब्दार्थ: विवरणं च

विश्वं सदेतदिति कार्यकरत्वहेतोर्यद्यस्य सत्त्वमिह साधयितुं यतेथाः ।

विश्वं सद्-एतद्-इति कार्य-करत्व-हेतोः-यदि-अस्य सत्त्वम्-इह साधयितुं यतेथाः ।

विश्वं – the whole world, universe,

विश्व (नपुं) - आदित्यविश्ववसवस्तुषिता भास्वरानिलाः। स्वर्गवर्गः। अर्थः - गणदेवता

विश्व (स्त्री-नपुं) - स्त्रीनपुंसकयोर्विश्वं नागरं विश्वभेषजम्। वैश्यवर्गः। अर्थः - शुण्ठी

विश्व (नपुं) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। विशेष्यनिघ्नवर्गः। अर्थः - समग्रम्

सदेतदिति = सत् एतत् इति		जश्त्व व्यञ्जनसन्धिः

सत् - being, existing, existent, esential, true, real

सत् (वि) - सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत्। नानार्थवर्गः।

एतत् – this

इति – is so

कार्यकरत्वहेतोर्यद्यस्य = कार्यकरत्वहेतोः यद्यस्य		रेफः विसर्गसन्धि

कार्यकरत्वहेतोर्यद्यस्य = कार्यकरत्वहेतोर्यदि-अस्य		यण स्वरसन्धिः

कार्य – what ought to be done		कृ + ण्यत्

करत्व – agency of who or what does, makes or causes		कर+त्व

हेतोः - from the reason/cause		हेतु, पञ्च ए

हेतु (पुं) - हेतुर्ना कारणं बीजं निदानं त्वादिकारणम्। कालवर्गः। अर्थः - कारणम्

यदि – if

यदि (अव्य) - पक्षान्तरे चेद्यदि च तत्त्वे त्वद्धाञ्जसा द्वयम्। अव्ययवर्गः। अर्थः - पक्षान्तरम्

अस्य – belonging to this

सत्त्वम् –reality, being, existence, nature, essence. सतो भावः । सत् + त्व

सत्त्व (नपुं) - विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः। कालवर्गः। अर्थः - गुणः

सत्त्व (नपुं) - द्रव्यासु व्यवसायेऽपि सत्त्वमस्त्री तु जन्तुषु। नानार्थवर्गः।

इह – here इदम् + ह

साधयितुं – in order to make an effort साध् धातुः णिजन्ते कर्तरि + तुमुन् प्रत्ययः

यतेथाः – you strive यत् धातुः, विधिलिङ्, मध्य ए

एथाः – you went इ धातुः in लुङ्-लकारः only Vedic/poetic)

| | | |
|---|---|---|
| एत् | एताम् | एन् |
| एथाः | एतम् | एत |
| एम् | एव | एम |

तर्ह्यत्र रज्जुभुजगाद्यपि सद्वलात्स्यात्सत्यत्वहेतुरिदमाहुरबाधितत्वम् ॥ ३७ ॥

तर्हि-अत्र रज्जु-भुजगादि-अपि सद्वलात्-स्यात्-सत्यत्व-हेतुः-इदम्-आहुर्-अबाधितत्वम् ॥ ३७ ॥

तर्ह्यत्र = तर्हि अत्

तर्हि – therefore, at that time, in that case तद्-र्हिल् प्रत्यय

अत्र - here

रज्जु - rope, cord, string

रज्जु (स्त्री) - शुल्बं वराटकं स्त्री तु रज्जुस्त्रिषु वटी गुणः। शूद्रवर्गः।

भुजग-आदि – snake etc. भुजं वक्रं गच्छतीति । गम् + डः Possibly भुज् + अग

भुजग (पुं) - सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः। पातालभोगिवर्गः। अर्थः - सर्पः

अपि – also

अपि (अव्य) – गर्हासमुच्चयप्रश्नशङ्कासम्भावनास्वपि। नानार्थवर्गः।

सद्वलात् = सत् वलात् जशत्व व्यञ्जनसन्धिः

सत् - being, existing, existent, esential, true, real

वलात् – same as बलात् – due to strength (of सत्)

बल (पुं) - सङ्कर्षणः सीरपाणिः कालिन्दीभेदनो बलः। स्वर्गवर्गः। अर्थः - बलभद्रः

बल (पुं) - स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च। क्षत्रियवर्गः। अर्थः - सेना

बल (पुं) - वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम्। क्षत्रियवर्गः। अर्थः - सेना

बल (नपुं) - द्रविणं तरः सहोबलशौर्याणि स्थाम शुष्मं च। क्षत्रियवर्गः। अर्थः - सामर्थ्यम्

बल (पुं) - स्थौल्यसामर्थ्यसैन्येषु बलं ना काकसीरिणोः। नानार्थवर्गः। अर्थः - काकः, स्थौल्यम्

वलात् – possibly from वल् धातु, implying “from concealment”

स्यात् -should be, may it be अस् धातुः, कर्तरि विधिलिङ्लकारः, प्र ए

सत्यत्व – reality, truth, veracity सत्य + त्व तुमुन् प्रत्यय

सत्य (वि) - सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति। शब्दादिवर्गः। अर्थः - सत्यवचनम्

सत्य (वि) - रहस्योपस्थयोर्गुह्यं सत्यं शपथतथ्ययोः। नानार्थवर्गः। अर्थः - शपथः, तथ्यम्

हेतुः - reason

हेतु (पुं) - हेतुर्ना कारणं बीजं निदानं त्वादिकारणम्। कालवर्गः। अर्थः - कारणम्

इदम् – this

आहुर् – आहुः - said अह् धातुः कर्तरि लिट्लकारः, प्र बहु

अबाधितत्वम् – unimpeded, unrestricted, unrefuted बाधित – बाध् + क्त; बाधित + त्व

समासा:

कार्यकरत्वहेतोः

रज्जुभुजगाद्

सद्बलात्

सत्यत्वहेतुः

---

कीदृग्विधं जगदये वद सत्त्वचित्त्या-

द्याकारहीनमिति पृष्टवतेऽस्ति मह्यम् ।

प्रत्युत्तरं किमिति ते तव मौनमेव

प्रत्युत्तरं भवति मां प्रति गच्छ जाल्म ॥ ३८ ॥

अन्वयः

कीदृग्विधं जगत् आदि अये आकारहीनमिति अस्ति, , मह्यम् सत्त्वचित्त्या पृष्टवते वद ।

ते प्रत्युत्तरं किमिति । मां प्रति तव मौनमेव प्रत्युत्तरं भवति। गच्छ जाल्म ! ॥ ३८ ॥

In what manner do the world etc. move, if devoid of forms. For me, for the one who has asked with pure mind, speak!. What is your response? Your silence towards me itself becomes the response. Go! Cruel/inconsiderate!

शब्दार्थः विवरणं च

कीदृग्विधं जगदये वद सत्त्वचित्त्याद्याकारहीनमिति पृष्टवतेऽस्ति मह्यम् ।

कीदृक्-विधं जगदये वद सत्त्व-चित्ति-आदि-आकार-हीनम्-इति पृष्टवते-अस्ति मह्यम् ।

कीदृग्विधं = कीदृक्-विधं जश्त्व व्यञ्जनसन्धिः

कीदृक् – is seen by who? is seen how? किम् + दृश् + क्विन्

क्विन्प्रत्ययान्तशब्दस्य पदान्ते कवर्गादेशः भवति

विधं – kind, sort, mode, manner, form.

जगदये – in the favorable moving/going of the world जगत् + अयः , सप्तमी ए

अय (पुं) - प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः। कालवर्गः। अर्थः – शुभावहविधिः। Favorable fortune

वद – noun: वदः/वदा/वदं Speaking, able to speak, speaking well or sensibly वद् धातुः + अच्

verb: to speak, वद् धातुः, कर्तरि लोट्लकारः, मध्यम पुः

| | | |
|---|---|---|
| वदतात्, वदताद्, वदतु | वदताम् | वदन्तु |
| वद, वदतात्, वदताद् | वदतम् | वदत |
| वदानि | वदाव | वदाम |

सत्त्वचित्त्याद्याकारहीनमिति = सत्त्वचित्त्यादि आद्य आकारहीनमिति यण स्वरसन्धिः

सत्त्व - being, existence, entity, nature, essence.
चित्ति – mind/wisdom
सत्त्व-चित्ति-आदि – pure-conciousness etc.
आकार – form , shape, figure, , aspect, appearance, countenance
हीनम् – lacking, without, abandoned, forsaken, destitute or deprived of, bereft of
इति – thus

पृष्टवतेऽस्ति = पृष्टवते अस्ति पूर्वरूप स्वरसन्धिः
पृष्टवते – for the one who has asked (प्रच्छ + क्तवतु, चतुर्थी ए)
अस्ति - is
मह्यम् – for me (असमद् शबदः, चतुर्थी ए)

प्रत्युत्तरं किमिति ते तव मौनमेव प्रत्युत्तरं भवति मां प्रति गच्छ जाल्म ॥ ३८ ॥
प्रत्युत्तरं किम्-इति ते तव मौनम्-एव प्रत्युत्तरं भवति मां प्रति गच्छ जाल्म ॥ ३८ ॥
प्रत्युत्तरं – प्रति-उत्तरम् – direct response, response with respect to यण स्वरसन्धिः
प्रति (अव्य) - प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः। नानार्थवर्गः। अर्थः – लक्षणादिः , प्रतिनिधिः, वीप्सा
उत्तर (नपुं) - प्रश्नोऽनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे। शब्दादिवर्गः। अर्थः - उत्तरम्
उत्तर (वि) - उपर्युदीच्यश्रेष्ठेष्वप्युत्तरः स्यादनुत्तरः। नानार्थवर्गः। अर्थः – श्रेष्ठः , उपरि, उत्तरदिक्
किम्-इति – what it is
ते – you all (तत् शब्दः, पुँ, प्र बहु or तत् शब्दः, स्त्री प्र/द्वितीया द्विवचन, or युष्मद् शब्दः चतुर्थी/षष्टी ए)
तव – your (युष्मद् शब्दः षष्ठी ए)
मौनम्-एव – not speaking alone, silence itself
मौन (नपुं) - उपस्पर्शस्त्वाचमनमथ मौनमभाषणम्। ब्रह्मवर्गः। अर्थः - मौनम्
प्रत्युत्तरं - प्रति-उत्तरम् – direct response, response with respect to
भवति – becomes (भू धातुः)
मां – to me (अस्मद् शब्दः, द्वि ए)
प्रति – towards, with respect to
प्रति (अव्य) - प्रति प्रतिनिधौ वीप्सालक्षणादौ प्रयोगतः। नानार्थवर्गः। अर्थः – लक्षणादिः, प्रतिनिधिः, वीप्सा
गच्छ – you go (गम् धातु, लोट्, मध्य, ए)
जाल्म – acting cruel, severe, harsh, rash, inconsiderate
जाल्म (पुं) - निहीनोऽपसदो जाल्मः क्षुल्लकश्चेतरश्च सः। शूद्रवर्गः। अर्थः - नीचः
जाल्म (वि) - जाल्मोऽसमीक्ष्यकारी स्यात्कुण्ठो मन्दः क्रियासु यः। विशेष्यनिघ्नवर्गः। अर्थः - असमीक्ष्यकारी

<u>समासाः</u>
सत्त्वचित्ति

---

ज्ञानाग्निदग्धमपि भाति जगद्विचित्रं
यच्च ध्वनिभ्रमवतः सविशेषबोधात् ।

तस्मिन्भ्रमे विमथितेऽपि तथैव भाति

दिग्वत्यथो मम च तद्वदतो न सत्तत् ॥ ३९ ॥

<u>अन्वय:</u>

ज्ञानाग्निदग्धम् अपि यच्च जगद्विचित्रं सविशेषबोधात् ध्वनिभ्रमवतः भाति ।

तस्मिन्भ्रमे विमथितेऽपि तथैव तत् भाति. अथो मम वदतो दिग्वत् च न तत् सत् ॥ ३९ ॥

Although burned by fire of knowledge, the splendrous world glows due to perception of its variety, and due to the echo of delusion. Even in that annihilated confusion, it shines in the same way. From my speaking, similar to a pointer, that is not true.

<u>शब्दार्थ: विवरणं च</u>

ज्ञानाग्निदग्धमपि भाति जगद्विचित्रं यच्च ध्वनिभ्रमवतः सविशेषबोधात् ।

ज्ञान-अग्नि-दग्धम्-अपि भाति जगद्-विचित्रं यत्-च ध्वनि-भ्रमवतः सविशेषबोधात् ।

ज्ञानाग्नि = ज्ञान + अग्नि सवर्ण दीर्घ स्वरसन्धिः

ज्ञान-अग्नि- fire of knowledge ज्ञान = ज्ञा धातु: + ल्युट्

ज्ञान (नपुं) - मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः। धीवर्गः। अर्थः – मोक्षोपयोगिबुद्धिः

अग्नि (पुं) - अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः। अर्थः - अग्निः

दग्धम्-अपि – although burned

दग्ध (वि) - प्लुष्टप्लुष्टोषिता दग्धे तष्टत्वष्टौ तनूकृते। विशेष्यनिघ्नवर्गः। अर्थः - दग्धः

भाति – (it) glows

जगद्विचित्रं= जगद्-विचित्रं = जगत्-विचित्रं जश्त्व व्यञ्जनसन्धिः

जगद्-विचित्रं – this variegated/captivating/wonderful world

जगत् (नपुं) - त्रिष्वथो जगती लोको विष्टपं भुवनं जगत्। भूमिवर्गः। अर्थः - लोकः

जगत् (वि) - त्रिष्वितो जगदिङ्गेऽपि रक्तं नील्यादि रागि च। नानार्थवर्गः। अर्थः – चरम्

चित्र (नपुं) - चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे। धीवर्गः। अर्थः - नानावर्णाः

चित्र (वि) - विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम्। नाट्यवर्गः। अर्थः - अद्भुतरसः

चित्र (नपुं) - आलेख्याश्चर्ययोश्चित्रं कलत्रं श्रोणिभार्ययोः। नानार्थवर्गः। अर्थः - आलेख्यम्

यच्च = यत्-च श्चुत्व व्यञ्जनसन्धिः

यत्-च – and which

ध्वनि- sound/echo/noise

भ्रमवतः – "belonging to" or "from" one filled with delusion भ्रम्+वतुप् ; भ्रमवत् शब्दः पञ्चमी/षष्ठी ए

भ्रम (पुं) - समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः। धीवर्गः। अर्थः - अतस्मित्तज्ज्ञानम्

भ्रम (पुं) - चक्राणि पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः। वारिवर्गः। अर्थः - जलनिस्सरणजालकम्

भ्रम (पुं) - ओषः प्लोषे नयो नाये ज्यानिर्जीर्णौ भ्रमो भ्रमौ। सङ्कीर्णवर्गः। अर्थः – भ्रमणम्

सविशेषबोधात् – "due to" or "from" togethernes with recognition of state/property/uniqueness

विशेष (वि) - विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः। कालवर्गः। अर्थः – कालावस्था। state or condition

तस्मिन्भ्रमे विमथितेऽपि तथैव भाति दिग्वत्यथो मम च तद्वदतो न सत्तत् ॥ ३९ ॥

तस्मिन्-भ्रमे विमथिते-अपि तथा-एव भाति दिग्वत्-यथो मम च तत् वदतः न सत्-तत् ॥ ३९ ॥

तस्मिन्-भ्रमे – in that delusion

विमथितेऽपि = विमथिते-अपि                                पूर्वरूप स्वरसन्धिः

विमथिते-अपि – even though scattered/annihilated/confused (in that)        वि + मथ् + क्त

तथैव = तथा-एव                                वृद्धि स्वरसन्धिः

तथा-एव भाति – "then only" / "like that only" it shines        भाति (v) – shines, भातिः (n) - lustre

दिग्वत् – possessing directions / similar to directions (the world)

यथो – यथा + उ like, as it occurs

मम च – and mine

तत् = that

वदतः - belonging to the one speaking                वदत् शब्दः = वद् धातुः शतृ प्रतययः, पञ्चमी/षष्ठी एक अथवा प्र/द्वि बहु

अतो न = अत उ न = अतः न                                उकार विसर्गसन्धिः + गुण स्वरसन्धिः

अतो – here/hereafter, therefore

न सत्-तत् – that is not true

<u>समासाः</u>

ज्ञानाग्निदग्धम्

---

भूमिं जले तदपि तेजसि तच्च वायौ
तं व्योम्नि तत्त्रिगुणया सह मय्यनन्ते ।
पूर्णे विलाप्य परिशिष्टमखण्डसंवि-
त्स्वानन्दरूपमनुभूय रमेऽहमद्य ॥ ४० ॥

<u>अन्वयः</u>

भूमिं जले (विलाप्य) तदपि तेजसि (विलाप्य) तच्च वायौ (विलाप्य) तं व्योम्नि (विलाप्य) परिशिष्टम् तत्त्रिगुणया सह मयि अनन्ते पूर्णे विलाप्य।
अखण्डसंवित्स्वानन्दरूपम् अनुभूय, अहम् अद्य रमे ॥ ४० ॥

Absorption of the Earth into Water, that next into Fire, and that into Air, that into Space, and all remaining, together with the Three Gunas, into Me, into the infinite and Whole. After experiencing that unbroken Knowledge, which is my innermost Blissful Self, I enjoy today.

<u>शब्दार्थः विवरणं च</u>

भूमिं जले तदपि तेजसि तच्च वायौ तं व्योम्नि तत्त्रिगुणया सह मय्यनन्ते ।

भूमिं जले तद्-अपि तेजसि तत्-च वायौ तं व्योम्नि तत्-त्रिगुणया सह मयि-अनन्ते ।

भूमिं – to the earth, or to a firm basis                भूमि – स्त्री द्वि ए

possibly a typographical error, should perhaps be भूमौ or भूम्नि

भूमि (स्त्री) - भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा। भूमिवर्गः। अर्थः - भूमिः

जले – in the water                जल – नपुं सप्त ए

जल (नपुं) - आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्। वारिवर्गः। अर्थः - जलम्

तदपि = तद्-अपि = तत् अपि जश्त्व व्यञ्जनसन्धिः

तत् अपि - that too

तेजसि – in brilliance (Fire element in this context) तेजस् – नपुँ सप्त ए

तेजस् (नपुं) - शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च। मनुष्यवर्गः। अर्थः - रेतस्

तेजस् (नपुं) - तेजः प्रभावे दीप्तौ च बले शुक्रेऽप्यतस्त्रिषु। नानार्थवर्गः। अर्थः - प्रभा, बलम्, प्रभावः

तच्च= तत् च श्चुत्व व्यञ्जनसन्धिः

तत्-च – and that

वायौ – in the air वायु – पुँ सप्त ए

वायु (पुं) - श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः. स्वर्गवर्गः. अर्थः - वायुः

तं – unto that

व्योम्नि – in space व्योमन् – नपुँ सप्त ए

व्योमन् (नपुं) - द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्। व्योमवर्गः। अर्थः - आकाशः

तत्-त्रिगुणया – by her who has three gunas (sattwa, rajas, tamas) त्रि+गुण+इनी =त्रिगुणिनी (स्त्री), तृ ए

सह – together with

मय्यनन्ते = मयि अनन्ते यण स्वरसन्धिः

मयि – in me

अनन्ते – boundless, eternal

अनन्त (नपुं) - नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खम्. व्योमवर्गः।अर्थः - आकाशः

अनन्त (पुं) - शेषोऽनन्तो वासुकिस्तु सर्पराजोऽथ गोनसे। पातालभोगिवर्गः। अर्थः - नागानाम् स्वामिः

अनन्त (वि) - कृत्रिमे लक्षणोपेतेऽप्यनन्तोऽनवधावपि. नानार्थवर्गः। अर्थः - अनवधिः

पूर्णे विलाप्य परिशिष्टमखण्डसंवित्स्वानन्दरूपमनुभूय रमेऽहमद्य ॥ ४० ॥

पूर्णे विलाप्य परिशिष्टम्-अखण्ड-संवित्-स्वानन्द-रूपम्-अनुभूय रमे-अहम्-अद्य ॥ ४० ॥

पूर्णे – in the unbroken, complete, Whole (सप्त ए)

पूर्ण (वि) - समग्रं सकलं पूर्णमखण्डं स्यादनूनके। विशेष्यनिघ्नवर्गः। अर्थः - समग्रम्

पूर्ण (वि) - पूर्णस्तु पूरिते क्लिष्टः क्लिशितेऽवसिते सितः। विशेष्यनिघ्नवर्गः। अर्थः - पूर्णः

विलाप्य – वि+लप्+ण्यत् – worthy of being spoken

वि+ला+णिचि यत् – worthy of causing one to obtain

वि+ली+ णिचि यत् – worthy of causing one to be absorbed, to be made thin/melted

विलापः - lamentation

परिशिष्टम् – what is left/retained/saved (शिष् धातुः, रुधादिः। परि+शिष्+क्त)

what is distinguished/described/characterized (शिष् धातुः, चुरादिः। परि+शिष्+क्त)

अखण्ड – unbroken

अखण्ड (वि) - समग्रं सकलं पूर्णमखण्डं स्यादनूनके। विशेष्यनिघ्नवर्गः। अर्थः - समग्रम्

संवित् – one who knows well, knowledge, ज्ञानम् सं + विद् + क्विप्

स्वानन्द – own bliss

आनन्द (पुं) - स्यादानन्दथुरानन्दः शर्मशातसुखानि च। कालवर्गः।

रूपम् – form

रूप (नपुं) - रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी। धीवर्गः। अर्थः - नेत्रेन्द्रियविषयः

अनुभूय – after having experienced, after having become

रमेऽहमद्य = रमे अहमअद्य पूर्वरूप स्वरसन्धिः

रमे – I enjoy (रम् धातु, लट्, उत्तम एक)

अहम् – I

अद्य – today

अद्य (अव्य) - अद्यात्राह्न्यथ पूर्वेऽह्नीत्यादौ पूर्वोत्तरापरात्। अव्ययवर्गः। अर्थः - अस्मिन्नहनि

<u>समासा:</u>

त्रिगुणया (त्रिगुणी)

स्वानन्द

---

अज्ञानतन्निरसने मयि बोधरूपे

स्यातां कथं तिमिरतद्विरती इवार्के ।

बन्धश्च मोक्ष इति कल्पनमप्यसत्यं

भ्रान्त्यैव भात्यखिलसाक्षिणि नित्यमुक्ते ॥ ४१ ॥

<u>अन्वय:</u>

अज्ञानतन्निरसने, तिमिरतद्विरती अर्के इव, मयि बोधरूपे अखिलसाक्षिणि नित्यमुक्ते, कथं स्यातां ।

बन्धश्च मोक्ष इति कल्पनमप्यसत्यं भ्रान्त्यैव भाति ॥ ४१ ॥

How can Ignorance and its refutation, like darkness and its elimination in the Sun, happen in Me, in manifestation of Knowledge, in witness of all, in the One always free. Concepts of Bondage and Liberation are also untrue, and flourish only due to Delusion.

<u>शब्दार्थ: विवरणं च</u>

अज्ञानतन्निरसने मयि बोधरूपे स्यातां कथं तिमिरतद्विरती इवार्के ।

अज्ञान-तत्-निरसने मयि बोध-रूपे स्यातां कथं तिमिर-तद्-विरती इव-आर्के ।

अज्ञानतन्निरसने – अज्ञान-तत् निरसने अनुनासिक व्यञ्जनसन्धिः

अज्ञान – ignorance अ+ ज्ञा + ल्युट्

अज्ञान (नपुं) - मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम्। धीवर्गः।

तत् – that

निरसने – in what expels/removes, in refutation निर्+अस्+ल्यट्

निरसन (नपुं) - प्रत्याख्यानं निरसनं प्रत्यादेशो निराकृतिः। सङ्कीर्णवर्गः। अर्थः - निराकरणम्

मयि – in me

बोध-रूपे – within the form of knowledge and understanding

स्यातां - may it be so (dual) अस् धातुः, विधिलिङ् प्र द्वि

कथं – how

तिमिरतद्विरती= तिमिरतद् विरती= तिमिरतत् विरती जश्त्व व्यञ्जनसन्धि:

तिमिर – dark, blind

तिमिर (नपुं) - अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः। पातालभोगिवर्गः। अर्थः - अन्धकारः

तद् – that

विरती इव – as if concluded, as if indifferent विरति शब्दः, स्त्री, प्रथमा द्वि। वि + रम–क्तिन्

विरति (स्त्री) - आरत्यवरतिविरतय उपरामेऽथ स्त्रियां तु निष्ठेवः। सङ्कीर्णवर्गः। अर्थः - उपरमणम्

इवार्के =इव+अर्के or इव+आर्के सवर्ण दीर्घ स्वरसन्धि:

अर्के – in the sun अर्कम्, सप्त ए

आर्के – as far as the sun आ+ अर्कम्, सप्त ए

अर्क (पुं) – विकर्तनार्कमार्तण्डमिहिरारुणपूषणः। दिग्वर्गः। अर्थः - सूर्यः

अर्क (पुं) - तक्षको नागवर्द्धक्योरर्कः स्फटिकसूर्ययोः। नानार्थवर्गः। अर्थः - स्फटिकम्

बन्धश्च मोक्ष इति कल्पनमप्यसत्यं भ्रान्त्यैव भात्यखिलसाक्षिणि नित्यमुक्ते ॥ ४१ ॥

बन्ध:-च मोक्ष इति कल्पनम्-अपि-असत्यं भ्रान्त्या-एव भाति-अखिल-साक्षिणि नित्यम्-उक्ते ॥ ४१ ॥

बन्धश्च= बन्ध स् च= बन्ध: च सकार विसर्गसन्धि: + श्चुत्व व्यञ्जनसन्धि:

बन्ध:-च – and bondages, a tie, a fetter बन्ध् + घञ्

मोक्ष – liberation, release, rescue मोक्ष् + घञ्

मोक्ष (पुं) - मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम्। धीवर्गः। अर्थः - मोक्षः

इति -thus

कल्पनमप्यसत्यं= कल्पनमपि+असत्यं यण स्वरसन्धि:

कल्पनम् – forming, fashioning, arranging कृप्/क्लृप् धातुः, ल्युट्,

अपि – also

असत्यं – untruth

सत्य (वि) - सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति। शब्दादिवर्गः। अर्थः – सत्यवचनम्

भ्रान्त्यैव= भ्रान्त्या+एव वृद्धि स्वरसन्धि:

भ्रान्त्या-एव by wandering about, by delusion भ्रम्-क्तिन्, भ्रान्ति शब्द: तृ ए

भ्रान्ति (स्त्री) - समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः। धीवर्गः। अर्थः – अतस्मिंत्तज्ज्ञानम्

भात्यखिलसाक्षिणि = भाति अखिलसाक्षिणि यण स्वरसन्धि:

भाति – shines

अखिल – complete, whole, without remnants

अखिल (वि) - विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम्। विशेष्यनिघ्नवर्गः।अर्थः - समग्रम्

साक्षिणि – witness साक्षीन् शब्द: सप्त ए

नित्यम् –perpetual, uninterrupted, obligatory, essential

नित्य (नपुं) - नित्यानवरताजस्रमप्यथातिशयो भरः। स्वर्गवर्गः। अर्थः - अविरतम्

नित्य (वि) - शाश्वतस्तु ध्रुवो नित्यसदातनसनातनाः। विशेष्यनिघ्नवर्गः। अर्थः - नित्यम्

उक्ते – it is said ब्रू/वच् धातुः, क्त, सप्त ए

समासा:
बोधरूपे
अखिलसाक्षिणि

---

आरब्धकर्मणि च भोगत एव नष्टे
प्राणादयोऽपि मम नोत्क्रमितुं समर्थाः ।
तप्ताग्निनिष्ठजतुवन्मयि पूर्णवोधे
लीना भवन्ति न पुनर्जननादिकं स्यात् ॥ ४२ ॥

अन्वय:
आरब्धकर्मणि च भोगत एव, नष्टे मम प्राणादयोऽपि नोत्क्रमितुं समर्थाः ।
तप्ताग्निनिष्ठजतुवत् मयि पूर्णवोधे लीना भवन्ति। पुनर्जननादिकं न स्यात् ॥ ४२ ॥

Karma (urge for Works) at the start (of life), has to be experienced only (no escape), upon their destruction, my Prana etc (respiration and other circulations) are incapable of moving onward. Like lacquer situated in burning fire, they dissolve in Me, in the complete Knowledge/Consciousness. Repeation of Birth and what subsequently follows do not occur.

शब्दार्थ: विवरणं च
आरब्धकर्मणि च भोगत एव नष्टे प्राणादयोऽपि मम नोत्क्रमितुं समर्थाः ।
आरब्ध-कर्मणि च भोगत एव नष्टे प्राण-आदयः-अपि मम न-उत्क्रमितुं समर्थाः ।
आरब्ध – started already, begun, commenced (आङ् + रभ् + क्तः)
कर्मणि च – works (कर्मन् शब्दः प्रथ बहु)
भोगत एव – from enjoyment / acceptance / endurance / experience only (possibly भोग+तसिल्)
भोग (पुं) - अहेः शरीरं भोगः स्यादाशीरप्यहिदंष्ट्रिका। पातालभोगिवर्गः। अर्थः - सर्पशरीरम्
भोग (पुं) - भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः। नानार्थवर्गः। अर्थः - आनन्दः, सर्पः, स्त्र्यादिभृतिः
नष्टे – in disappearance/loss/destruction नष्ट – नश्+क्त (सप्त ए)
नष्ट (वि) - पराजितपराभूतौ त्रिषु नष्टतिरोहितौ। क्षत्रियवर्गः। अर्थः – निलीनः
प्राणादयोऽपि = प्राण आदयोऽपि सवर्ण दीर्घ स्वरसन्धि
प्राणादयोऽपि = प्राणादय: अपि उकार विसर्गसन्धिः + गुण स्वरसन्धिः+ पूर्वरूप स्वरसन्धिः
प्राण-आदयः-अपि – beginning with respiration (vital circulations also)
प्राण (पुं) - प्राणोऽपानः समानश्चोदानव्यानौ च वायवः। स्वर्गवर्गः। अर्थः - शरीरवायुः
प्राण (पुं) - शक्तिः पराक्रमः प्राणो विक्रमस्त्वतिशक्तिता. क्षत्रियवर्गः. अर्थः - सामर्थ्यम्
प्राण (पुं) - पूंसि भूम्न्यसवः प्राणाश्चैवं जीवोऽसुधारणम्। क्षत्रियवर्गः। अर्थः - पञ्चवायवः
प्राण (पुं) - वोलगन्धरसप्राणपिण्डगोपरसाः समाः। वैश्यवर्गः। अर्थः - गन्धरसः
मम – my
नोत्क्रमितुं = न उत्क्रमितुं गुण स्वरसन्धिः+

न - cannot

उत्क्रमितुं – to overcome/increase/go-up     उत्+क्रम्+तुमुन्

समर्थाः – are capable/competent/prepared (प्र बहु)

तप्ताग्निनिष्ठजतुवन्मयि पूर्णवोधे लीना भवन्ति न पुनर्जननादिकं स्यात् ॥ ४२ ॥

तप्त-अग्नि-निष्ठजतुवन्मयि पूर्णवोधे लीना भवन्ति न पुनर्जननादिकं स्यात् ॥ ४२ ॥

तप्ताग्निनिष्ठजतुवन्मयि = तप्त अग्निनिष्ठजतुवन्मयि

तप्ताग्निनिष्ठजतुवन्मयि = तप्ताग्निनिष्ठजतुवत् मयि     अनुनासिक व्यञ्जनसन्धिः

तप्त- burned     तप्+क्त

अग्नि – fire

अग्नि (पुं) - अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः। स्वर्गवर्गः। अर्थः - अग्निः

निष्ठ – being in or on, situated on, depending or resting on, referring or relating to

जतुवत् – similar to red lacquer

जतु (नपुं) - लाक्षा राक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः। मनुष्यवर्गः। अर्थः - लाक्षा

मयि – in me

पूर्णवोधे – in the awareness of completeness

पूर्ण (वि) - समग्रं सकलं पूर्णमखण्डं स्यादनूनके। विशेष्यनिघ्नवर्गः। अर्थः - समग्रम्

पूर्ण (वि) - पूर्णस्तु पूरिते क्लिष्टः क्लिशितेऽवसिते सितः। विशेष्यनिघ्नवर्गः।

लीना – adhered to or absorbed/dissolved (ली+क्त)

भवन्ति - become

न – not

पुनर्जननादिकं = पुनः जननादिकं     रेफः विसर्गसन्धि

पुनर्जननादिकं = पुनर्जनन आदिकं     सवर्ण दीर्घ स्वरसन्धिः

पुनर्-जनन-आदिकं – repeated birth and so on

पुनर् (अव्य) - पुनरप्रथमे भेदे निर्निश्चयनिषेधयोः। नानार्थवर्गः। अर्थः - अप्रथमः, भेदः

पुनर् (अव्य) - स्युरेवं तु पुनर्वै वेत्यवधारणवाचकाः। अव्ययवर्गः। अर्थः - निश्चयार्थः

पुनःपुनर् (अव्य) - मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः। अव्ययवर्गः। अर्थः - पौनःपुन्यः

स्यात् – can happen (अस् धातुः, विधि प्र ए)

<u>समासा:</u>

आरब्धकर्मणि

तप्ताग्निनिष्ठजतुवत्

पूर्णवोधे

---

आम्नायमस्तकसुसंस्कृतवैभवोऽहं

व्योम्नोऽपि पूर्णतममूर्तिरहं स्थितोऽहम् ।

सर्वालयोऽहमहमाद्यवभासकोऽहं

वागाद्यगोचरसदोदितसौख्यकोऽहम् ॥ ४३ ॥

अन्वयः

आम्नायमस्तकसुसंस्कृतवैभव: अहं, व्योम्नोऽपि पूर्णतममूर्तिरहं, स्थितोऽहम्,

अहम् सर्वालय:, अहमाद्यवभासक:, अहं वागादि-अगोचर, अहं सदोदितसौख्यक: ॥ ४३ ॥

I am that resplendent peak of perfection in that which is handed down traditionally (vedas), I am a form that is more complete than Space itself, I am established (unchanging, unmoving). I am the abode of all,  I am the original illuminator.  I am beyond perception by speech and so forth, always arisen, dispenser of bliss.

शब्दार्थः विवरणं च

आम्नायमस्तकसुसंस्कृतवैभवोऽहं व्योम्नोऽपि पूर्णतममूर्तिरहं स्थितोऽहम् ।

आम्नाय-मस्तक-सुसंस्कृत-वैभव:-अहं व्योम्न:-अपि पूर्णतम-मूर्ति:-अहं स्थित:-अहम् ।

आम्नायमस्तकसुसंस्कृतवैभवोऽहं = आम्नायमस्तकसुसंस्कृतवैभव+उ+अहं = आम्नायमस्तकसुसंस्कृतवैभव: अहं        उकार विसर्गसन्धिः + गुण स्वरसन्धिः + पूर्वरूप स्वरसन्धिः

आम्नाय – to hand down traditionally, to keep in mind,  commit to memory,  study,  repeat (आ-म्ना-घञ्)

मस्तक – the head or top of anything,  peak,  summit

मस्तक (पुं-नपुं) - उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्। मनुष्यवर्गः। अर्थः – शिरः

सुसंस्कृत – perfected, highly finished (सु + सम् + कृ—क्त ; सम्+कृत=संस्कृत possibly समः सुटि)

संस्कृत (वि) - युक्तेऽतिसंस्कृतेऽमर्षिण्यभिनीतोऽथ संस्कृतम्। नानार्थवर्गः। अर्थः - कृत्रिमम्, लक्षणोपेतम्

वैभव: - glory,  grandeur,  magnificence, might (विभव+अण्)

विभव (पुं) - हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि। वैश्यवर्गः। अर्थः - द्रव्यम्

अहं – I

व्योम्नोऽपि= व्योम्न+उ+अपि = व्योम्न:+अपि        उकार विसर्गसन्धिः + गुण स्वरसन्धिः + पूर्वरूप स्वरसन्धिः

व्योम्न: - than space/ether (व्योमन् शब्दः, पञ्च/षष्ठी ए)

व्योमन् (नपुं) - द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरम्। व्योमवर्गः। अर्थः - आकाशः

अपि – also

पूर्णतममूर्तिरहं = पूर्णतममूर्ति: + अहं        रेफः विसर्गसन्धि

पूर्णतम – most complete, most whole, most full

पूर्ण (वि) - समग्रं सकलं पूर्णमखण्डं स्यादनूनके। विशेष्यनिघ्नवर्गः। अर्थः - समग्रम्

पूर्ण (वि) - पूर्णस्तु पूरिते क्लिष्टः क्लिशितेऽवसिते सितः। विशेष्यनिघ्नवर्गः।

मूर्ति: - form, embodiment,  incarnation,  personification,  manifestation

मूर्ति (स्त्री) - कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः। मनुष्यवर्गः। अर्थः - देहः

अहं – I

स्थितोऽहम्= स्थित+उ+अहम् = स्थित:+अहम्        उकार विसर्गसन्धिः + गुण स्वरसन्धिः + पूर्वरूप स्वरसन्धिः

स्थित: - one who is situated (स्था+क्त)

अहम् - I

सर्वालयोऽहमहमाद्यवभासकोऽहं वागाद्यगोचरसदोदितसौख्यकोऽहम् ॥ ४३ ॥

सर्व-आलय:-अहम्-अहम्-आदि-अवभासक:-अहं वाग्-आदि-अगोचर-सदा-उदित-सौख्यक:-अहम् ॥ ४३ ॥

सर्वालयोऽहमहमाद्यवभासकोऽहं= सर्व+आलयोऽहमहमाद्यवभासकोऽहं सवर्ण दीर्घ स्वरसन्धि:

सर्वालयोऽहमहमाद्यवभासकोऽहं = सर्वालय+उ+अहमहमाद्यवभासकोऽहं = सर्वालय:+अहमहमाद्यवभासकोऽहं उकार विसर्गसन्धि: + गुण स्वरसन्धि: + पूर्वरूप स्वरसन्धि:

सर्वालयोऽहमहमाद्यवभासकोऽहं = सर्वालयोऽहमहमादि+अवभासकोऽहं यण स्वरसन्धि:

सर्वालयोऽहमहमाद्यवभासकोऽहं = सर्वालयोऽहमहमाद्यवभासक+उ+अहं = सर्वालयोऽहमहमाद्यवभासक:+अहं उकार विसर्गसन्धि: + गुण स्वरसन्धि: + पूर्वरूप स्वरसन्धि:

सर्व – all, every

आलय: - abode, house, receptacle, place

आलय (पुं) - गृहाः पुंसि च भून्म्येव निकाय्यनिलयालयाः। पुरवर्गः। अर्थः - गृहम्

अहम् – I

अहम् – I

आदि – original

अवभासक: - illuminator, the Supreme Spirit (अव+भास्+ण्वुल् or अव+भास्+णिच्+ण्वुल्)

भास् (स्त्री) - स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः। दिग्वर्गः। अर्थः - प्रभा

अहं – I

वागाद्यगोचरसदोदितसौख्यकोऽहम् = वाग्+आद्यगोचरसदोदितसौख्यकोऽहम्

वागाद्यगोचरसदोदितसौख्यकोऽहम् = वागादि+अगोचरसदोदितसौख्यकोऽहम् यण स्वरसन्धि:

वागाद्यगोचरसदोदितसौख्यकोऽहम् = वागाद्यगोचरसदा+उदितसौख्यकोऽहम् गुण स्वरसन्धि:

वागाद्यगोचरसदोदितसौख्यकोऽहम् = वागाद्यगोचरसदोदितसौख्यक+उ+अहम् = वागाद्यगोचरसदोदितसौख्यक:+अहम् उकार विसर्गसन्धि: + गुण स्वरसन्धि: + पूर्वरूप स्वरसन्धि:

वाग् – speech

आदि – etc.

अगोचर – impercievable by senses

गोचर (पुं) - गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम्। धीवर्गः। अर्थः - विषयाः

सदा – always

उदित – risen, spoken (वद् + क्त or उत् + इण + क्त)

सौख्यक: - creator of well being, of felicity (सौख्य - सुखमेव । स्वार्थे ष्यञ्) (सौख्यक: - सौख्य +

अहम् - I

<u>समासा:</u>

आम्नायमस्तकसुसंस्कृतवैभव:

---

इति श्रीसदाशिवेन्द्रसरस्वत्या विरचितः आत्मविद्याविलासः (२) संपूर्णः ॥

Thus, written by Sri Sadashivendra Saraswati, AtmaVidyaVilasah (2) (is) complete.